नं. १६

अथपातंजलयोगशास्त्र सांख्यप्रवचनभाष्यम्

४२७५

तदेव तमसानुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भव
ति तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं
रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति तदेव र
जोलेशमलापेतं स्वरूपंप्रतिष्ठं सत्वपुरुषान्यताख्या
तिमात्रं धर्ममेघध्यानोपगं भवति तत्परं प्रसंख्या
नमित्याचक्षते ध्यायिनः चितिशक्तिरपरिणामिनी
अप्रतिसंक्रमा दर्शितविषया शुद्धा चानंता च सत्वगु
णात्मिका [illegible] विवेकख्यातिरित्यतस्त
स्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि तदवस्थं
संस्कारोपगं भवति स निर्बीजः समाधिः न तत्र किंचि
६ त्संप्रज्ञायत इत्यसंप्रज्ञातः द्विविधः स योगश्चित्तवृत्ति
निरोध इति तदवस्थे चेतसि विषयाभावाद्बुद्धिबो
धात्मा पुरुषः किंस्वभाव इति तदा द्रष्टुः स्वरूपेऽवस्था

पा० यो० नं स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथाकैवल्ये
शा० व्युत्थानचित्ते तु सति तथापि भवन्ती न तथा कथं स्वरूपप्र
१ नर्हि दर्शितविषयत्वात् वृत्तिसारूप्यमितरत्र व्यु [illegible]
त्थाने याः चित्तवृत्तयः तदविशिष्टवृत्तिः पुरुषः ता।
प्याचसूत्रं एकमेव दर्शनं ख्यातिरेव दर्शनमिति चि
त्तमयस्[illegible]कल्पं सान्निधिमात्रोपकारि दृ
श्यत्वेन स्वं भवति पुरुषस्य स्वामिनः तस्माच्चित्तवृत्ति
बोधे पुरुषस्यानादिसंबंधो हेतुः ताः पुनर्निरोद्धव्या
बहुत्वे सति चित्तस्य ४ वृत्तयः पंचतय्यः क्लिष्टाक्लि
ष्टाः क्लेशहेतुकाः कर्माशयप्रचये क्षेत्रीभूताः क्लिष्टाः ख्या
तिविषया गुणाधिकारविरोधिन्योऽक्लिष्टाः क्लिष्टप्र
वाहपतिता अप्यक्लिष्टाः क्लिष्टच्छिद्रेष्वप्यक्लिष्टा भवं
ति अक्लिष्टच्छिद्रेषु क्लिष्टा इति तथाजातीयकाः

संस्कारा वृत्तिभिरेव क्रियंते संस्कारैश्च वृत्तय इति एवं
वृत्तिसंस्कारचक्रमनिशमावर्त्तते तदेवंभूतं चित्तम
वसिताधिकारमात्मकल्पेन व्यवतिष्ठते प्रलयं वा
गछतीति ताः क्लिष्टाक्लिष्टाश्च पंचधा वृत्तयः ५:
प्रमाणविपर्ययविकल्पनिद्रास्मृतयः तत्र प्रत्यक्षा त
नुमानागमाः प्रमाणानि इंद्रियप्रणालिकया चित्त
स्य बाह्यवस्तूपरागात्तद्विषया सामान्यविशेषात्म
नोर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमा
यां फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः बुद्धेः
प्रतिसंवेदी पुरुष इत्युपरिष्टादुपपादयिष्यामः अ
नुमेयस्य तुल्यजातीयेष्वनुवृत्तो भिन्नजातीयेभ्यो व्या
वृत्तः संबंधो यः तद्विषया सामान्यावधारणप्रधान
ना वृत्तिरनुमानं यथा देशांतरप्राप्तेर्गतिमच्चंद्र

पा॰ यो॰ रकं चैत्रत्वं द्विध्यस्याप्राप्तेरगतिः आप्तेनदृष्टोनुमितो
शा॰ वार्थः परत्रस्वबोधसंक्रांतयेशब्देनोपदिश्यते शब्दात्त
२ दर्थविषयावृत्तिः श्रोतुरागमः यस्याश्रद्धेयार्थोवक्ता
नदृष्टानुमितार्थः सआगमः प्लवते मूलवक्तरितुदृ
ष्टानुमितार्थेनिर्विप्लवःस्यात् ६ विपर्ययोमिथ्याज्ञा
नमतद्रू[illegible]ष्ठं सकस्मान्नप्रमाणं यतः प्रमाणे
नबाध्यते भूतार्थविषयत्वात्प्रमाणस्य तत्रप्रमा
णेनबाधनमप्रमाणस्यदृष्टंतथयथाद्विचंद्रदर्शनस्य स
द्विषयेनैकचंद्रदर्शनेनबाधनमिति सेयंपंचपर्वा
भवत्यविद्या अविद्यास्मितारागद्वेषाभिनिवेशाः
पंचक्लेशाइति एतएवस्वसंज्ञाभिस्तमोमोहोमहामो
हस्तामिस्रोंधतामिस्र इति एतेचित्तमलप्रसंगेनाभि
धास्यंते ७ शब्दज्ञानानुपातीवस्तुशून्योविकल्प

सनप्रमाणोपारोहीनविपर्ययोपारोहीचवस्तुशून्यत्वे
पिशब्दज्ञानमाहात्म्यनिबंधनोव्यवहारोदृश्यते त-
द्यथा चैतन्यंपुरुषस्यस्वरूपमिति यदाचितिरेव
पुरुषःतदाकिमत्रकेनव्यपदिश्यते भवतिचव्य
पदेशेवृत्तिः यथा चैत्रस्यगौरिति तथाप्रतिषिद्ध
वस्तुधर्मानिःक्रियःपुरुषःतिष्ठतिबाणःस्थास्य
तिस्थितइतिगतिनिवृत्तौधात्वर्थमात्रंगम्यते तथा
नुत्पत्तिधर्मापुरुषइतिउत्पत्तिधर्मस्याभावमात्र
मवगम्यतेनपुरुषान्वयीधर्मः तस्माद्विकल्पितः
सधर्मस्तेनचास्तिव्यवहारइति ९ अभावप्रत्यया
लंबनावृत्तिर्निद्रा साचसंप्रबोधे प्रत्यवमर्शात् प्र-
त्ययविशेषः कथंसुखमहमस्वाप्संप्रसन्नंमेमनः
लघुनिमेगात्राणिप्रज्ञांमेविशारदीकरोति दुःखमहम

स्त्यानं मे मनो भ्रमत्यनवस्थितं गाढं मूढो
हमस्वाप्सं गुरूणि मे गात्राणि क्लांतं मे चित्तं अलसं मुषि
तं इव तिष्ठतीति स खल्वयं प्रबुद्धस्य प्रत्यवमर्शो
न स्यादसति प्रत्ययानुभवे तदाश्रिताः स्मृतय
श्च तद्विषया न स्युः तस्मात्प्रत्ययविशेषो निद्रा
सा च समाधावितरप्रत्ययवन्निरोद्धव्येति ॥१०॥ अनुभू
तविषयासंप्रमोषः स्मृतिः किं प्रत्ययस्य चित्तं स्म
रति आहोस्विद्विषयस्येति ग्राह्योपरक्तः प्रत्ययो ग्रा
ह्यग्रहणोभयाकारनिर्भासः तज्जातीयकं संस्का॰ नि=
रमारभते स संस्कारः स्वव्यंजकांजनः तदाकारामेव
ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति तत्र
ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिः सा
च द्वयी भावितस्मर्तव्या चाभावितस्मर्तव्या च

स्वप्नेभावितस्मर्तव्याजाग्रत्समयेत्वभावितस्मर्त
व्येति सर्वाश्चैताःस्मृतयःप्रमाणविपर्ययविकल्प
निद्रास्मृतीनामनुभवात्प्रभवंति सर्वाश्चैतावृत्त
यःसुखदुःखमोहात्मिकाः सुखदुःखमोहाश्चक्ले
शेषु—— ध्याः सुखानुशयीरागः दुःखानुशयीद्वे
षःमोहःपुनरविद्येति एताःसर्वावृत्तयोनिरोद्धव्याः
आसांनिरोधेसंप्रज्ञातोवासमाधिर्भवति असंप्र
ज्ञातोवेति अथासांनिरोधेकउपायइति १ अभ्या
सवैराग्याभ्यांतन्निरोधः चित्तनदीनामोभयतो
वाहिनीवहतिकल्याणायवहतिपापायचयातुकै
वल्यप्राग्भाराविवेकविषयनिम्नासाकल्याणवहा
संसारप्राग्भाराविवेकविषयनिम्नापापवहासा १२
तत्रवैराग्येणविषयस्रोतःखिलीक्रियतेविवे

पा॰ यो॰ तद्दर्शनाभ्यासेन कल्पनाराम्भो तत उद्घाटयतः त्युभयाधीनश्च
चि॰ – वृत्ति – रोधः ११ तत्र स्थितौ यत्नोऽभ्यासः – चित्तस्यावृत्ति
कस्य प्रशांतवाहिता स्थितिः तदर्थः प्रयत्नो वीर्यमुत्साहः
3 तत्संपिपादयिषया तत्साधनानुष्ठानमभ्यासः १३ स तु
दीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिः दीर्घकाला
सेवितो निरंतरासेवितः तपसा ब्रह्मचर्येण च विद्यया श्रद्धया
च संपादितः सत्कारवान् दृढभूमिर्भवति व्युत्थानसंस्कारे
ण द्रागित्येवानभिभूतविषय इत्यर्थः १४ दृष्टानुश्रविक
विषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् स्त्रियोऽन्नपानमै
श्वर्यमिति दृष्टविषयेपि – – – – स्वर्गविदेहप्रकृतिलय
त्वप्राप्तावानुश्रविक विषयवितृष्णस्य दिव्यादिव्यविष
यसंप्रयोगे चित्तस्य विषयदोषदर्शिनः प्रसंख्यानबला
दनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैरा

ण्यं १६ तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं दृष्टानुश्रवि
कविषयदोषदर्शी विरक्तः पुरुषदर्शनाभ्यासात्तच्छुद्धिप्र
विवेकाप्यायितबुद्धिः गुणेभ्यो व्यक्ताव्यक्तधर्मकेभ्यो
विरक्त इति द्वितीयं वैराग्यं तत्र यदुत्तरं तज्ज्ञानप्रसा
दमात्रं यस्योदये प्रत्युदितख्यातिरतिक्रांतमेवाविनीय
स्थितिरेवं मन्यते प्राप्तं प्रापणीयं क्षीणाः क्षेतव्याः क्लेशाः
छिन्नः श्लिष्टपर्वा भवसंक्रमो यस्याविच्छेदाज्जनित्वा म्रियते
मृत्वा च जायते इति ज्ञानस्यैव परा काष्ठा वैराग्यमेतस्यैव
हि नांतरीयकं कैवल्यमिति अथोपायद्वयेन निरुद्धचि
त्तवृत्तिकस्य कथ्यते संप्रज्ञातः समाधिरिति १७ वितर्
कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः वितर्कः
चित्तस्यालंबने स्थूल आभोगः सूक्ष्मो विचारः आ
नंदो ह्लादः एकात्मिका संविदस्मिता तत्र प्रथमः

पा॰ यो॰ चतुष्टयानुगा — समाधि सवितर्को द्वितीयो वितर्क

शा॰ विकलः सविचारः तृतीयो विचारविकलः सानंदश्च

५ तुर्यस्तद्विकलः अस्मितामात्र इति सर्व एते सालंबनाः

4 समाधयः अन्यथा संप्रज्ञातसमाधिः किमुपायः किंस्व

भावो वेति १६ — — विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषो

न्यः सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधः चित्तस्य

समाधिरसंप्रज्ञातः तस्य परं वैराग्यमुपायः सालंबनो

ह्यभ्यासस्तत्साधनाय कल्पते इति विरामप्रत्ययो निर्वस्तुक पन १ तत्र

आलंबनी क्रियते सर्वार्थशून्यः तदभ्यासपूर्वं चित्तं नि

रालंबनम् अभावप्राप्तमिव भवतीत्येष निर्बीजः समाधि

रसंप्रज्ञातः स खल्वयं द्विविधः उपायप्रत्ययो भवप्रत्ययश्च

श्च तत्रोपायप्रत्ययो योगिनां भवति १७ भवप्रत्ययो

विदेहप्रकृतिलयानां विदेहानां देवानां भवप्रत्ययः

तोहि स्वसंस्कारमात्रोपभोगेन चित्तेन कैवल्यपदमिवानु
भवंतः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयंति
तथा प्रकृतिलयाः साधिकारे चेतसि प्रकृतिलीने कैवल्य
पदमिवानुभवंति यावन्न पुनरावर्ततेऽधिकारवशाच्चि
त्तमिति १९ श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरे
षां उपायप्रत्ययो योगिनां भवति श्रद्धा चेतसः संप्रसादः
सा हि जननीव कल्याणी योगिनं पाति तस्य हि श्रद्दधा
नस्य विवेकार्थिनो वीर्यमुपजायते समुपजातवीर्य
स्य स्मृतिरुपतिष्ठते स्मृत्युपस्थाने च चित्तमनाकुलं
समाधीयते समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते ये
न यथार्थं वस्तु जानाति तदभ्यासात्तद्विषयाच्च वैराग्या
दसंप्रज्ञातः समाधिर्भवति ते खलु नव योगिनो मृदु
मध्याधिमात्रोपाया भवंति तद्यथा मृदूपायो मध्यो

पा॰ यो॰ पायोऽधिमात्रोपाय इति तत्र मृदूपायस्त्रिविधः मृदु
श्रा॰ संवेगो मध्यसंवेगस्तीव्रसंवेग इति तथा मध्योपायस्त
थाऽधिमात्रोपाय इति तत्राधिमात्रोपायानां तीव्र
संवेगानामासन्नः समाधिलाभः समाधिफलं च भवती
ति १९ मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः मृदु
तीव्रो मध्यतीव्रो ऽधिमात्रतीव्र इति ततोऽपि विशेषः मृदु
तीव्रसंवेगस्यासन्नस्ततोऽपि मध्यतीव्रसंवेगस्यासन्न
तरस्ततोऽपि अधिमात्रतीव्रसंवेगस्यासन्नतमः समाधिला
भः समाधिफलं च भवति किमेतस्मादेवासन्नतरः समा
धिर्भवति अथास्य लाभे भवत्यन्योऽपि कश्चिदुपायो न वे
ति २० ईश्वरप्रणिधानाद्वा प्रणिधानाद्भक्तिविशेषा
दावर्जित ईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण तदभि
ध्यानादपि योगिन आसन्नतरः समाधिलाभः समाधिफलं

ती

वम्भवन्ति अथचेतनपुरुषव्यतिरिक्तः कोयमीश्वरोना
मेति २१ क्लेश

पा॰यो॰ लेनानवछेदात् पूर्वेह्यि गुरवः कालेनावछिद्यन्ते यत्रा॰
भा॰ वछेदार्थेन कालो नोपावर्तते स एष पूर्वेषामपि गुरुः यथा
७ स्य सर्गस्यादौ प्रकर्षगम्यत्वात् सिद्धिस्तथातिक्रांतसर्गादि
7 ष्वपि प्रत्येतव्या २४ तस्य वाचकः प्रणवः वाच्य ईश्वरः
प्रणवस्य किमस्य संकेतकृतं वाच्यवाचकत्वं अथ प्रदी
पप्रकाशवदस्थितमिति स्थितोस्य वाच्यस्य वाचके
न सह संबंधः संकेतस्त्वीश्वरस्य स्थितमेवार्थमभिधुनय
ति यथावस्थितः पितापुत्रयोः संबंधः संकेतेनावद्योत्य
ते अयमस्य पिता अयमस्य पुत्र इति सर्गान्तरेष्वपि वाच्यवाच
कशक्त्यपेक्षस्तथैव संकेतः क्रियते संप्रतिपत्तिनित्यतया
नित्यः शब्दार्थसंबंध इत्यागमिनः प्रतिजानते विज्ञातवा
च्यवाचकत्वस्य योगिनः २५ तज्जपस्तदर्थभावनं प्र
णवस्य जपः प्रणवाभिधेयस्य ईश्वरस्य भावनं तस्य यो

गिनः प्रसादं जपतः प्रसादाँश्चैवभावयतश्चित्तमेका-
ग्रं—संपद्यते तथा चोक्तं स्वाध्यायाद्योगमासीत यो
गात्स्वाध्यायमामनेत स्वाध्याययोगसंपत्त्या परमा
त्मा प्रकाशत इति विदितो भवति २८ ततः प्रत्यक्
चेतनाधिगमोप्यंतरायाभावश्च। पेतावदन्तरायाः व्या
धिप्रभृतयः तेतावदीश्वरप्रणिधानान्नभवंति स्वरूपदर्श
नमप्यस्य भवति यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केव
लोऽनुपसर्गः तथायमपि बुद्धेः प्रतिसंवेदी यः पुरुषस्तम
धिगच्छति अथ केंतरायाः ये चित्तस्य विक्षेपाः के उन
तिकियन्तो वेति २९ व्याधिस्त्यानसंशयप्रमादालस्या
विरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्त-
विक्षेपास्तेंतरायाः नवांतरायाश्चित्तस्य विक्षेपाः सह
ह एते चित्तवृत्तिभिर्भवंत्येषामभावे न भवंति पूर्वोक्ताश्चित्त

पा॰ यो॰ न्तरायः तत्र व्याधिर्धातुरसकरणवैषम्यं स्त्यानमक
शा॰ र्मण्यता चित्तस्य संशय उभयकोटिस्पृग्विज्ञानं
८ स्यादिदमेवं नैवं स्यादिति प्रमादः समाधिसाधनाना
8 नामभावनं आलस्यं कायस्य चित्तस्य गुरुत्वादप्रवृत्तिः
अविरतिः चित्तस्य विषयसंप्रयोगात्मा गर्द्धः भ्रान्तिद
र्शनं विपर्ययज्ञानं अलब्धभूमिकत्वं समाधिभूमेरला
भः अनवस्थितत्वं यल्लब्धायां भूमौ चित्तस्याप्रतिष्ठा
समाधिप्रतिलम्भे हि तदवस्थितं स्यादिति एते चित्त
विक्षेपा नव योगमलाः योगप्रतिपक्षाः योगान्तराया
इत्यभिधीयन्ते २८ दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा
विक्षेपसहभुवः दुःखमाध्यात्मिकं आधिभौतिकं
आधिदैविकं च येनाभिहताः प्राणिनस्तदुपघाताय
प्रयतन्ते तद्दुःखं दौ

पा० यो० नमेवाधमानमनेनासेव्यमितिनिभाग्यते स्वाध्यायः प्र
प्रा० णवादिपवित्राणांजपः मोक्षशास्त्राध्ययनंच ईश्वर
१० प्रणिधानंसर्वक्रियाणांपरमगुरावर्पणंतत्फलसंन्यासो
वा सहिक्रियायोगः समाधिभावनार्थः क्लेशतनू
10 करणार्थश्च सहिआसेव्यमानः समाधिभावयतिक्ले
शांश्चप्रतनूकरोति प्रतनूकृतान्क्लेशान्प्रसंख्यानाग्नि
नादग्धबीजकल्पानऽप्रसवधर्मिणः करिष्यतीति तेषां
तनूकरणात्पुनः क्लेशैरपरामृष्टासत्वपुरुषान्यतामात्र
ख्यातिः सूक्ष्माप्रज्ञासमाप्ताधिकाराप्रतिप्रसवायकल्पि
ष्यतइति अथकेक्लेशाः कियंतोवेति अविद्यास्मितारा
गद्वेषाभिनिवेशाः क्लेशाः ३ क्लेशाइतिपंचविपर्ययाइ
त्यर्थः तेस्पंदमानागुणाधिकारंदृढयंतिपरिणाममव
स्थापयंति कार्यकारणस्रोतउन्नमयंति परस्परानुग्र

हतंत्रीभूत्वाकर्मविपाकंचाभिनिर्हरंति अविद्याक्षेत्र
मुत्तरेषांप्रसुप्ततनुविछिन्नोदाराणां ४ अत्राविद्या
क्षेत्रंप्रसवभूमिरुत्तरेषामस्मितादीनांचतुर्विकल्पा
नांप्रसुप्ततनुविछिन्नोदाराणां तत्रकाप्रसुप्तिः चेत
सिशक्तिमात्रप्रतिष्ठानांबीजभावोपगमस्तस्यप्रबो
धआलंबनेसंमुखीभावः प्रसंख्यानवतोदग्धक्ले
श — बीजस्यसंमुखीभूतेप्यालंबनेनासौपुनरस्तिदग्ध
बीजस्यकुतःप्ररोहइति अतःक्षीणक्लेशः कुशलश्च
रमदेहइत्युच्यते तत्रैवसादग्धबीजभावापंचमीक्लेशा
वस्थानान्यत्रेति सतांक्लेशानांबीजसामर्थ्यंदग्धमिति तदा
विषयस्यसंमुखीभावेपिसतिनभवत्येषांप्रबोधइति
उक्ताप्रसुप्तिः दग्धबीजानामप्ररोहश्च तनुत्वमु
च्यते प्रतिपक्षभावनोपहताः क्लेशास्तनवोभवंति

पा० यो० तथाविछिद्यविछिद्यतेनतेनात्मनापुनःसमुदाचा-
शा० रंतीतिविछिन्नाः कथं^कालेक्रोधस्यादर्शनात्नहि राग
१३ रागकालेक्रोधःसमुदाचरति रागश्चक्वचिद्दृश्यमानो
13 नविषयांतरेनास्ति नैकस्यांस्त्रियांचैत्रोरक्तइति अन्या ५४
सुस्त्रीषुविरक्तइतिकिंतुतत्ररागोलब्धवृत्तिरन्यत्रतुभवि
ष्यद्वृत्तिरिति सतदाप्रसुप्ततनुविछिन्नोभवति
विषयेयोलब्धवृत्तिःसउदारःसर्वएवैतेक्लेशविषयत्वं
नातिक्रामंति कस्तर्हिविछिन्नःप्रसुप्तस्तनुरुदारोवाः
क्लेशइत्युच्यते सत्यमेवैतत् किंतुविशिष्टानामेवै
षांविछिन्नादित्वंयथैवप्रतिपक्षभावनातोनिवृत्तस्त
थैवस्वव्यंजकांजनेनाभिव्यक्तइति सर्वएवामीक्लेशा
अविद्याभेदाःकस्मात्सर्वेष्वविद्यैवाभिप्लवतेयदवि
द्ययावस्त्वाकार्यतेतदेवानुशेरतेक्लेशाःविपर्यासप्रत्यय १३

दुःखानुशयी द्वेषः दुः — — भि — — दुःखो — स्मृतिपूर्वेण दुः
खे तत्साधने वा यः प्रतिघो मन्युर्जिघांसा तत्क्रोधः स द्वे — —
स्वरसवाही — — — पि तथारूढोऽभिनिवेशः ९ सर्वस्य प्रा
णिन इयमात्माशीर्नित्या भवति मा न भूवं भूयासमि —
— न चाननुभूतमरणधर्मकस्यैषा भवत्यात्माशीः एतया
च पूर्वजन्मानुभवः प्रतीयते स चायं — — भिनिवेशः क्लेशः स्व
रसवाही कृमेरपि जातमात्रस्य प्रत्यक्षानुमानागमैरसंभा
वितो — — च्छेदं दृष्ट्यात्मकः पूर्वजन्मानुभूतम
रणदुःखमनुमा — पयति यथा चायमत्यंतमूढेषु दृश्यते
क्लेशः तथा विदुषोऽपि विज्ञातपूर्वापरांतस्य रूढः कस्मा
त् समाना हि तयोः कुशलाकुशलयोर्मरणदुःखानुभवादि ल
— — यं वासना ते प्रतिप्रसवहेयाः सूक्ष्माः १० ते पंच क्लेशा
— दग्धबीजकल्प — ः योगिनश्चरिताधिकारे चेतसि प्रलीने

नेसत्त्वे नैवास्तंगच्छंतीति स्थितानांतु बीजभावोपगता
नां ध्यानहेयास्तद्वृत्तयः क्लेशानां या वृत्तयः स्थू ११
लास्ताः क्रियायोगेन तनूकृताः सत्यः प्रसंख्यानेन
ध्यानेन हातव्याः यावत्सूक्ष्मीकृता यावद्दग्धबीजक
ल्पा — यथा च वस्त्राणां स्थूलो मलः पूर्वं निर्धूयते पश्चा
त्सूक्ष्मो यत्नेनोपायेन चापनीयते तथा स्वल्पप्रति
पक्षाः स्थूला वृत्तयः क्लेशानां सूक्ष्मास्तु महाप्रतिपक्षा
इति क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः
१२ तत्र पुण्यापुण्यकर्माशयः कामलोभमोहक्रोधप्रभवः
स दृष्टजन्मवेदनीयश्चादृष्टजन्मवेदनीयश्च तत्र ती
व्रसंवेगेन मन्त्रतपःसमाधिभिर्निर्वर्तित ईश्वरदेवताम
हर्षिमहानुभावानामाराधनाद्वा यः परिनिष्पन्नः स
सद्यः परिपच्यते पुण्यकर्माशय इति तथा तीव्रक्लेशे

नभीतव्याधितकृपणेषुविश्वासोपगतेषुवामहा
नुभावेषुवातपस्विषुकृतः पुनरपकारः सचापिपा
पकर्माशयः सद्यएवविपच्यते यथानंदीश्वरः कु
मारोमनुष्यपरिणामंहित्वादेवत्वेनपरिणतः तथा
नहुषोपिदेवानामिंद्रः स्वकंपरिणामंहित्वातिर्यक्त्वे
नपरिणतइति तत्रनारकाणांनास्तिदृष्टजन्मवेद
नीयः कर्माशयः क्षीणक्लेशानामपिनास्त्यदृ
ष्टजन्मवेदनीयःकर्माशयइति सतिमूलेतद्विपाको
जात्यायुर्भोगाः सत्सुक्लेशेषुकर्माशयोविपाकारं
भीभवति नोच्छिन्नक्लेशमूलः यथातुषावनद्धाःशा
लितंडुलाअदग्धबीजभावाःप्ररोहसमर्था — — ना
पनीततुषादग्धबीजभावावा तथाक्लेशावनद्धः
कर्माशयोपिविपाकप्ररोहीभवति — पनीतक्लेशो

पा·यो· नत्रसंख्यानस्यपत्नीभावोवेति सवाखेपकालाभिवि
शा· घोजाभिरापुर्भोगशति --दृद्विचार्यते किमेकंक
मएकस्यजन्मनःकारणं अथैकंकर्मानेकंजन्माक्षि
पतीति द्वितीय---रणाकिमनेकंकर्मानेकंजन्म
निर्वर्त्तयति अथानेकंकर्मैकंजन्मनिवर्त्तयतीति
नतावत्--कर्मैकस्यजन्मनःकारणं कस्मादना
16 दि-लप्रचितस्यासंख्येया--वशिष्टस्यकर्मः-
--नकस्यचफलक्रमानियमात् अनाश्वासोलोका
स्यप्रसक्तःसचानिष्टइति-चैककर्मानेक--जन्मनः
कारणं कस्मा-मेकेषुजन्मसुएकैकमेवकर्मानेकस्य
जन्मकारणंकस्मात्तदनेकंजन्मयुगपन्नसंभवतीति
क्रमेणैववाच्यं तथाचपूर्वदोषानुषंगः तस्माज्जन्म
प्रायणान्तरेकृतःपुण्यापुण्यकर्माशयप्रचयोविचित्रःप्रधा
रूकृ

नोपसर्जनीभावेनावस्थितः प्रायणाभिव्यक्तः एक
प्रघट्टकेन मरणं प्रसाध्य संमूर्छित एकमेव जन्म करो
ति तच्च जन्म तेनैव कर्मणा लब्धायुष्कं भवति तस्मि
न्नायुषि तेनैव कर्मणा भोगः संपद्यत इति असौ कर्मा
शयो जन्मायुर्भोगहेतुत्वात् त्रिविपाकोऽभिधीयत इति
अत एकभविकः कर्माशय उक्त इति दृष्टजन्मवेद
नीयस्त्वेकविपाकारंभी भोगमात्रहेतुत्वात् द्विविपाका
रंभी वायुर्भोगहेतुत्वात् नंदी— — नहुषवद्वेति क्ले
शकर्मविपाकानुभवनिर्वर्तिताभिस्तु वासनाभिरिदम
नादिकालसंमूर्छितमिदं विचित्रीकृतमिव सर्वतो मत्स्य
जालं ग्रंथिभि— वाततं इत्येता अनेकभवपूर्वि— वास—
—— स्त्वयं कर्माशय एष एवैकभविक उक्त इति — संस्का
राः स्मृतिहेतवः ता वासनाः ताश्चानादिकालीना इति

पा॰ यो॰ य स्त्वसावेकभविकः कर्माशयः सानियतविपाकस्तानि

शा॰ यतविपाक — — — जन्मवेदनीयस्यनियतविपाकस्यैवा हष्ट

१८ यनियमोनत्वदृष्टजन्मवेदनीयस्याभिधा — — — —

२७ — — वकस्यात् योदृष्टजन्मवेदनीयोनिव — — — न

लस्यन्नत्वयोगमनि कृतस्याविप — प्र — शः प्रधान।

17 कर्मणाया।

पा॰ यो॰ पंकेमग्न इति एवापरिशिष्टदुःख --- मप्रतिकूलात्म
भा॰ खावस्थायामपि योगिनमेव क्लिश्नातीति अथ का
१२ तापदुःखता सर्वस्य द्वे --- विद्धचेतनाचेतनसाध
१२ नाधीनस्तापानुभव इति तत्रास्ति द्वेषजः कर्माशयः
सुखसाधनानि च --- र्थयमानः कायेन वाचा मनसा
18 च परिस्पंदते ततः परमनुगृह्णात्युपहन्ति चेति परानुग्र
हपीड --- धर्माधर्मावुपचिनोति स कर्माशयो लोभात्
मोहाच्च भवतीत्येषा तापदुःखतोच्यते का पुनः संस्का
रदुःखता सुखानुभवात्सुखसंस्काराशयो दुःखा
नुभवादपि दुःखसंस्काराशय --- दुःखानुभवाद
पि दुःखसंस्काराशय कर्मभ्यो विपाकेऽनुभूयमाने सुख
दुःखे वा पुनः कर्माशय - चय इति एवमिदमनादि
दुःखस्रोतो विप्रसृतं कर्म योगिनमेव प्रतिकूलात्म

कृत्वा दुःखयति कस्मादक्षिपात्रकल्पो हि विद्वानिति य।
थोर्णातन्तुरक्षिपात्रे न्यस्तः स्पर्शेन दुःखयति न चान्येषु
गात्रावयवेषु एवमेतानि दुःखान्यक्षिपात्रकल्पं।
योगिनमेव क्लिश्यन्ति नेतरं प्रतिपत्तारं क्लिश्यन्ति इ
तरं तु स्वकर्मोपहृतं दुःखमुपात्तमुपात्तं त्यजन्तं त्यक्तं त्यक्तमु
पाददानमनादिवासनाविचित्रया चित्तवृत्त्या समन्त
तोऽनुविद्धमिवाविद्यया हातव्य एवाहंकारममकारानु
पातिनं जातं जातं बाह्याध्यात्मिकोभयनिमित्तास्त्रिप
र्वाणस्तापा अनुप्लवन्ते तदेवमनादिना दुःखस्रोतसा
ऊह्यमानमात्मानं भूतग्रामं च दृष्ट्वा योगी सर्वदुःखक्षयकार
णं सम्यग्दर्शनं शरणं प्रपद्यत इति गुणवृत्तिविरोधा।
च्च दुःखमेव सर्वं विवेकिनः प्रख्याप्रवृत्तिस्थितिरूपा।
बुद्धिगुणाः परस्परानुग्रहतन्त्रीभूत्वा शान्तं घोरं मूढं वा।

पा·यो· प्रत्ययंत्रिगुणाएवारभंते चलंचगुणवृत्तमितिक्षिप्र
शा· परिणामिचित्तमुक्तंरूपातिशयावृत्त्यतिशयाश्चप
१८ रस्परेणविरुध्यंते सामान्यानित्वतिशयैःसहप्रवर्तंते
एवमेतेगुणाइतरेतराश्रयेणोपार्जितसुखदुःख
19 मोहप्रत्ययाइति सर्वेसर्वरूपाःभवंति गुणप्रधानभा
वकृतस्त्वेषांविशेषइति तस्माद्दुःखमेवसर्वंविवेकि
नइति तदस्यमहतोदुःखसमुदायस्यप्रभवबीजमवि
द्यातस्याश्चसम्यग्दर्शनमभावहेतुः यथाचिकित्सा
शास्त्रंचतुर्व्यूहंरोगोरोगहेतुरारोग्यंभैषज्यमितिएव
मिदमपिशास्त्रंचतुर्व्यूहमेव तद्यथासंसारःसंसारहे
तुःमोक्षोमोक्षोपायइति तत्रदुःखबहुलःसंसारोहे
यःप्रधानपुरुषयोःसंयोगोहेयहेतुः संयोगस्यात्यं
तिकीनिवृत्तिर्हानंहानोपायःसम्यग्दर्शनं तत्रहातुः

पा
स्वरूपमुपादेयंवाहेयंवानभवितुमर्हतीति हानेतस्यो
च्छेदवादप्रसंगः उपादानेचहेतुवादः उभयप्रत्या।
ख्यानेशाश्वतवादइत्येतत्सम्यग्दर्शनं तदेत
च्छास्त्रंचतुर्व्यूहमित्यभिधीयते हेयंदुःखमनाग
तं १६ दुःखमतीतमुपभोगेनातिवाहितंनहेयपक्षे
वर्त्तते वर्त्तमानंचस्वक्षणेभोगारूढमितिनतत्क्ष
णांतरेहेयतामापद्यते तस्माद्यदेवानागतंदुःखं
तदेवाक्षिपात्रकल्पंयोगिनंक्लिश्नाति नेतरंप्रति
पत्तारंतदेवहेयतामापद्यते तस्माद्यदेवहेयमित्युच्यते ॥
तस्यैवकारणंप्रतिनिर्दिश्यते द्रष्टृदृश्ययोःसंयो। यो
१७ गोहेयहेतुः १७ द्रष्टाबुद्धेःप्रतिसंवेदीपुरुषः दृश्या
बुद्धिसत्त्वोपारूढाःसर्वेधर्माः तदेतद्दृश्यमयस्का
न्तमणिकल्पंसंनिधिमात्रोपकारिदृश्यत्वेनभवत

पा॰ यो॰ षस्य स्वं दर्शिरूपस्य स्वामिनः अनुभवकर्मविष
शा॰ यतामापन्नं अन्यस्वरूपेण प्रतिपन्नमन्यस्वरूपेण
२॰ प्रतिलब्धात्मकं स्वतंत्रमपि परार्थत्वात्परतंत्रं तयो
२० र्दृग्दर्शनशक्त्योरनादिरर्थकृतः संयोगो हेयहेतुः
दुःखस्य कारणमित्यर्थः तथा चोक्तं तत्संयोगहे
तुविवर्जनात्स्यादयमात्यंतिको दुःखप्रतीकारः क
स्मात् दुःखहेतोः परिहार्यस्य प्रतीकारदर्शनात् य
था पादतलस्य भेद्यता कंटकस्य भेत्तृत्वं परिहारः
कंटकस्य पादानधिष्ठानं पादत्राणव्यवहितेन वाधि
ष्ठानमेतत्त्रयं यो वेद लोके स तत्र प्रतीकारमारभ
माणो भेदजं दुःखं प्राप्नोति कस्मात् त्रित्वोपलब्धि
सामर्थ्यादिति अत्रापि तापकस्य रजसः सत्व
मेव तप्यं कस्मात् — क्रियायाः कर्मस्थत्वात्सत्वे क

मांप्रतिप्रतिक्रियातत्परिणामिनिनिः क्रियेद्वैतत्कृतेदर्शि
नविषय --- त्वेकत्वमानेतदकारानुरोधीकुर्वातृण ७
तस्तिदृश्यते दृश्यस्वरूपमुच्यते प्रकाशक्रि --- ।
पितिशीलंभूतेंद्रियात्मकंभोगापवर्गार्थंदृश्यं १८
प्रकाशशीलंसत्वंक्रियाशीलंरजः स्थितिशी --- म
इति एतेगुणाः परस्परोपरक्तप्रविभागापरिणामिनः
संयोगविभागधर्माण इतरेतरोपाश्रये --- वार्जितमू
र्तयः परस्परांगांगित्वेप्यसंभिन्नशक्तिप्रविभागाः तुल्य
जातीयतुल्यजातीयशक्तिभेदा --- तिनः प्रधानवेला
याम्उपदर्शितसन्निधानागुणत्वेपिचव्यापारमात्रेण
प्रधानांतर्नीतानुमित --- पुरुषार्थकर्तव्यतया
प्रयुक्तसामर्थ्याः सन्निधिमात्रोपकारिणोऽयस्कांत
मणिकल्पाः प्र --- मंतरेणैकतमस्यवृत्तिमनुवर्तमा

पा॰यो॰ नाःप्रधानशब्दवाच्याभवंतिएतद्दृश्यमित्युच्यते तद
शा॰ ----द्रियात्मकंभूतभावेनपृथिव्यादिनासूक्ष्मस्थूले
२२ परिणमतेतथेंद्रियभावेनश्रोत्र ---- सूक्ष्मस्थूलेन
परिणमतइति तत्तुनाप्रयोजनमुररीकृत्यप्रवर्ततइति
२१ भोगापवर्गार्थं ---- दृश्यंपुरुषस्येति तत्रेष्टानिष्ट
गुणस्वरूपावधारणमविभागापन्नंभोगः भोक्तृस्वरूपा
वधारणमपवर्गइति द्वयोरतिरिक्तमन्यद्दर्शनंनास्ति
तथाचोक्तं अयंतुखलुत्रिषुगुणेषुकर्तृष्वकर्तरि
चपुरुषेतुल्यातुल्यजातीयेचतुर्थेतत्क्रियासाक्षिण्युप
नी[illegible]मानान्सर्वभावानुपपन्नाननुपश्यन्नदर्श
नमन्यच्छंकतइति तावेतौभोगापवर्गौबुद्धिकृतौबु
द्धावेववर्तमानौकथंपुरुषेव्यपदिश्येतेइति यथा
विजयःपराजयोवायोद्धृषुवर्तमानःस्वामिनिव्यपदिश्य

तेसतितत्फलस्यभोक्तेति एवंबंधमोक्षौबुद्धावेववर्त्तमा
नौपुरुषेउपदिश्येतेसतितत्फलस्यभोक्तेति बुद्धि
रेवपुरुषार्थपरिसमाप्तिर्बंधः तदर्थावसायोमोक्षइ
तिएतेनग्रहणधारणोहापोहतत्त्वज्ञानाभिनिवेशा
बुद्धौवर्त्तमानाःपुरुषेध्यारोपिताःसत्त्वात्सतितत्फ
लस्यभोक्तेति इहप्रधानंस्वरूपभेदाद्विचारणा
र्थमिदमारभ्यते विशेषाविशेषलिंगमात्रालिंगा
निगुणपर्वाणीति तत्राकाशवाय्वग्न्युदकभूमयोभूता
नि शब्दस्पर्शरूपरसगंधतन्मात्राणामविशेषाणां
विशेषाः तथाश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानिबु
द्धींद्रियाणिवाक्पाणिपादपायूपस्थाःकर्मेंद्रियाणि
एकादशंमनःसर्वार्थमित्येतान्यस्मितालक्षण
स्याविशेषस्यविशेषाःगुणानामेषषोडशकोवि

पा॰यो॰ शेषपरिणामः षडविशेषाश्च तद्यथा शब्दतन्मा
भा॰ त्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गंधतन्मात्रं
२२ चेति एकद्वित्रिचतुःपंचलक्षणाः शब्दादयः पंचा
22 विशेषाः षष्ठश्चाविशेषोऽस्मितामात्र इत्येते सत्ता
मात्रस्यात्मनो महतः षडविशेषपरिणामाः यत्त
त्परमविशेषेभ्यो लिंगमात्रं महत्तत्वं तस्मिन्नेते स
त्तामात्रे महत्यात्मन्यवस्थाय विवृद्धिकाष्ठामनुभ
वंति प्रतिसंसृज्यमानाश्च तस्मिन्नेव सत्तामात्रे मह
त्यात्मन्यवस्थाय यत्तन्निःसत्तासत्तं निःसदसदव्य
क्तमलिंगं प्रधानं तत्प्रतियंतीत्येष तेषां लिंगमा
त्रपरिणामो निःसत्तासत्तं चालिंगपरिणाम इति अ
लिंगावस्थायां न पुरुषार्थो हेतुः नालिंगावस्थाया
मादौ पुरुषार्थता कारणं भवतीति नास्याः पुरुषार्थ

ताकारणंभवतीतिनासौपुरुषार्थकृतेतिनित्याख्या
यते त्रयाणांत्ववस्थाविशेषाणामादौपुरुषार्थताका
रणंभवति सचार्थोहेतुर्निमित्तंकारणंभवतीत्यनि
त्याख्यायते गुणास्तुसर्वधर्मानुपातिनोनप्रत्य
स्तमयंते नोपजायंतेव्यक्तिभिरेवातीतानागत
म= व्ययागमवतीभिर्गुणान्वयिनीभिरुपजननापा
यधर्मकाइवप्रत्यवभासंते यथादेवदत्तोदरिद्राति
कस्माद्यतोस्यम्रियंतेगावइतिगवामेवमरणा
त्तस्यदरिद्राणंनस्वरूपहानिरितिसमःसमाधिः
लिंगमात्रमलिंगस्यप्रत्यासन्नं तत्रतत्संसृष्टंवि
विच्यते क्रमानतिवृत्तेः तथाषडविशेषाःलिं
गमात्रेसंसृष्टाविविच्यंतेपरिणामक्रमनिय
मात्तथातेष्वविशेषेषुभूतेंद्रियाणिसंसृष्टा

पा. यो. निर्विविच्यंते तथाचोक्तंएकंवाअतोविशेषेभ्यःपरं
शा. तत्त्वांतरमस्तीतिनास्ति विशेषाणांतत्त्वांतरपरि
णामः तेषांतुधर्मलक्षणावस्थापरिणामाव्या
ख्यायिष्यंते॥ व्याख्यातंदृश्यं अथद्रष्टुःस्वरूपा
23 वधारणार्थमिदमारभ्यते द्रष्टादृशिमात्रःशुद्धो
ऽपिप्रत्ययानुपश्यः २० दृशिमात्रइतिदृक्शक्ति
ध रेवविशेषणापरामृष्टेत्यर्थः सपुरुषोबुद्धेः
प्रतिसंवेदी सबुद्धेर्नसरूपोनात्यंतंविरूपइति न
तावत्सरूपः कस्मात्ज्ञाताज्ञातविषयत्वात्प
रिणामिनीहिबुद्धिः तस्याश्चविषयोगवादिर्घ
टादिर्वाज्ञातश्चाज्ञातश्चेतिपरिणामित्वंदर्शय
ति सदाज्ञातविषयत्वंतुपुरुषस्यापरिणामित्वं
परिदीपयति कस्मात्नहिबुद्धिश्चनामपुरुषविषयः

स्याद्गृहीतश्चागृहीतश्चेतिसिद्धंपुरुषस्यसदाज्ञा
तविषयत्वंततश्चापरिणामित्वमिति । किंचपरार्था
बुद्धिःसंहत्यकारित्वात्स्वार्थःपुरुषइतितथासर्वा
र्थाध्यवसायकत्वात्त्रिगुणाबुद्धिःत्रिगुणत्वादचेत
पु॰ नेतिगुणानांतूपद्रष्टापुरुषइत्यतोनसरूपः
अस्तुतर्हिविरूपइति नात्यंतंविरूपः कस्मात्
शुद्धोप्यसौप्रत्यया --- नुपश्योयतः प्रत्ययंबौद्धमनु
पश्यति तमनुपश्यन्नतदात्मापितदात्मकइव
प्रत्यवभासतेतथाचोक्तं अपरिणामिनीहिभो
क्तृशक्तिरप्रतिसंक्रमाचपरिणामिन्यर्थेप्रतिसं
क्रांतेवतद्वृत्तिमनुपतति तस्याश्चप्राप्तचैतन्योप
ग्रहरूपायाबुद्धिवृत्तेरनुकारमात्रतयाबुद्धिवृत्त्य
विशिष्टाहिज्ञानवृत्तिरित्याख्यायते तदर्थएवदृश्यस्या

स्यात्मा २१ दृशिरूपस्य पुरुषस्य कर्मविषयतामा
पन्नं दृश्यमिति तदर्थ एव दृश्यस्यात्मा भवति स्व
रूपं भवतीत्यर्थः स्वरूपं पररूपेण प्रतिलब्धा
त्मकं भोगापवर्गार्थतायां हि तायां पुरुषेण न दृ
श्यत इति स्वरूपहानादस्य नाशः प्राप्तः न तु विन
श्यति कस्मात् कृतार्थं प्रति नष्टमप्यनष्टं तद
न्यसाधारणत्वात् २२ कृतार्थमेवैकं पुरुषं प्रति
दृश्यं नष्टमपि नाशं प्राप्तमपि न नष्टं तदन्यपुरु
षसाधारणत्वात् कुशलं पुरुषं प्रति नाशं प्राप्त
मप्यकुशलान्पुरुषान्प्रति अकृतार्थानिति तेषां
दृष्टेः कर्मविषयतामापन्नं लभत एव पररूपेणा
त्मरूपमिति अत एव दृग्दर्शनशक्त्योर्नित्यत्वा
त् अनादिः संयोगो व्याख्यात इति तथा चोक्तं

धर्मिणामनादिसंयोगात् धर्ममात्राणामप्यनादिः
संयोग इति संयोगस्वरूपाभिधित्सयेदं सूत्रं प्रववृते
स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः २३
पुरुषः स्वामी दृश्येन स्वेन दर्शनार्थं संयुक्तः तस्मात्सं
योद्दृश्यस्योपलब्धिर्यः संयोगः या तु द्रष्टुः स्वरूपोप भो.
लब्धिः सोऽपवर्गः दर्शनकार्यावसानः संयोग इति दर्श
नं वियोगस्य कारणमुक्तं दर्शनमदर्शनस्य प्रति
द्वंद्वीत्यदर्शनं संयोगनिमित्तमुक्तं नात्र दर्शनं मो
क्षकारणं अदर्शनाभावादेव बंधाभावः स मोक्ष इति
दर्शनस्य भावे बंधकारणस्यादर्शनस्य नाश इत्य
तो दर्शनज्ञानं कैवल्यकारणमुक्तं किं चेद — दर्श
नं नाम किं गुणानामधिकारः आहोस्विद्दृशिरूप
स्य स्वामिनो दर्शितविषयस्य प्रधानचित्तस्य

पा॰ यो॰ द॰ स्तस्मिन्दृश्ये विद्यमाने योऽदर्शनाभावः किमर्थं
भा॰ कं गुणानां अथ अविद्या स्वचित्तेन सह निरुद्धा ---
२५ चित्तस्योत्पत्तिबीजं किं स्थितिसंस्कारक्षये गतिसं
25 स्काराभिव्यक्तिः यत्रेदमुक्तं प्रधानं स्थित्यैव व
र्त --- विकाराकरणादप्रधानं स्यात् तथा गत्यै
व वर्त्तमानं विकारनित्यत्वादप्रधानं स्यात् उभयथा
चास्य --- वृत्तिः प्रधानव्यवहारं लभते नान्यथा
कारणांतरेष्वपि कल्पितेष्वेव समानश्चर्चः द
र्शनशक्तिरेवादर्शनमित्येके प्रधानस्यात्मख्या
पनार्था प्रवृत्तिरिति श्रुतेः सर्वबोध्यबोधसमर्थः
प्राक्प्रवृत्तेः पुरु --- न पश्यति सर्वकार्यकरणस
मर्थं दृश्यं तदा न दृश्यत इति उभयस्याप्यदर्शनं ध
र्म इत्येके तत्रेदं दृश्यस्य स्वात्मभूतमपि पुरुष

त्स्ययमपेक्ष्यादर्शनं दृश्यधर्मत्वेन भवति तथा
पुरुषस्यानात्मभूतमपि पुरुषवैयापेक्षं पुरुषधर्म॥ दृश्यधर्
मत्त्वेनैवादर्शनमवभासते दर्शनं ज्ञानमेवादर्श
नमितिनिकेविदभिदधति इत्येतेशास्त्रगतः विकल्पाः
तच्चाविकल्पवस्तुत्वमेतत् सर्वपुरुषाणांगुणसंयो॥
गेसाधारणाविषयं यत्प्रत्यक्चेतनस्यस्वबुद्धि
संयोगः तस्यहेतुरविद्या २४ विपर्ययज्ञानवास
नेत्यर्थः विपर्ययज्ञानवासनावासिताहि कार्य
निष्ठांप्राप्तांपुरुषख्यातिंबुद्धिः प्राप्नोतिसाधि
कारापुनरावर्तते सातुपुरुषख्यातिपर्यवसाना
कार्यनिष्ठांप्राप्नोतिचरिताधिकारानिवृत्तादर्श
नंबन्धकारणाभावान्नपुनरावर्तते अत्रकश्चित्पं
डकोपाख्यानेनोद्घाटयति मुग्धयाभार्ययाभिधी

पा॰ यो॰ यत्नैः पंडकस्त्वार्यपुत्रअपत्यवतीमेभगिनीति कि
पा॰ मर्थंनाहमिति सतामाहमृतस्तेहमुत्पादयिष्या
२६ मीतितत्र थेदंविद्यमानंज्ञानंचित्तनिवृत्तिंनकरोति
28 विनष्टंकरिष्यतीतिकाप्रत्याशा तत्राचार्यदेशी
योवक्ति ननुबुद्धिनिवृत्तिरेवमोक्षोऽदर्शनकारणा
भावाद्बुद्धिनिवृत्तिः तच्चादर्शनंबंधकारणंदर्श
नान्निवर्त्तते तत्रचित्तनिवृत्तिरेवमोक्षः किमर्थम
स्थानएवास्यमतिविभ्रमः हेयंदुःखंहेयकारणं
चसंयोगाख्यंसनिमित्तमुक्तं अतःपरंहानंवक्त
व्यं तदभावात्संयोगाभावोहानंतद्दृशेःकैवल्यं
२५ तस्यादर्शनस्याभावात् बुद्धिपुरुषसंयोगा
भावः आत्यंतिकोबंधनोपरम इत्यर्थः एतद्धा
नंतद्दृशेःकैवल्यंपुरुषस्यामिश्रीभावःपुनरसंयोगो

गुणैरित्यर्थः दुःखकारणनिवृत्तौ दुःखोपरमो हानं तदा
स्वरूपप्रतिष्ठः पुरुष इत्युक्तं अथ हानस्य कः प्राप्त्युपाय
इति विवेकख्यातिरविप्लवा हानोपायः २६ सत्वपुरुषा
न्यताप्रत्ययो विवेकख्यातिः सत्वनिवृत्तमिथ्याज्ञाना
प्लवते यदा मिथ्याज्ञानं दग्धबीजभावं वंध्यप्रसवं संपद्य
ते तदा विधूतक्लेशरजसः सत्वस्य परे वैशारद्ये परस्यां व
शीकारसंज्ञायां वर्तमानस्य विवेकप्रत्ययप्रवाहो निर्म
लो भवति सा विवेकख्यातिरविप्लवा हानस्योपायस्ततो
मिथ्याज्ञानस्य दग्धबीजभावोपगमः पुनश्चाप्रसव इत्येव
मोक्षस्य मार्गो हानस्योपाय इति तस्य सप्तधा प्रान्तभूमि
प्रज्ञा २७ तस्येति प्रत्युदितख्यातेः प्रत्ययाम्नायः सप्तधे
ति अशुद्ध्यावरणमलापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे
सति सप्तप्रकारैव प्रज्ञा विवेकिनो भवति तद्यथा परिज्ञात

पा॰ यो॰ हेयंनास्यपुनःपरिज्ञेयमस्ति — क्षीणाहेयहेतवोनपुनरेतेषां
भा॰ क्षेतव्यमस्तिसाक्षात्कृतंनिरोधसमाधिनाहानंभावितो
२७ विवेकख्यातिरूपोहानोपायइत्येषाचतुष्टयीकार्याविमु
27 क्तिःप्रज्ञायाः चित्तविमुक्तिस्तुत्रयी चरिताधिकाराबुद्धि
र्गुणागिरिशिखरकूटच्युताइवग्रावाणोनिरवस्थानाः
स्वकारणेप्रलयाभिमुखाःसहतेनास्तंगच्छंति नचै
षांप्रविलीनानांपुनरस्त्युत्पादःप्रयोजनाभावादिति
एतस्यामवस्थायांगुणसंबंधातीतःस्वरूपमात्रज्यो
तिरमलःकेवलीपुरुषइत्येतांसप्तविधांप्रांतभूमिप्रज्ञा
मनुपश्यन्पुरुषःकुशलइत्याख्यायतेप्रतिप्रसवेपिच
चित्तस्यमुक्तःकुशलइत्येवभवतिगुणातीतत्वादिति
सिद्धाभवतिविवेकख्यातिःहानोपायइति नचसिद्धि
रंतरेणसाधनमित्येतदारभ्यते योगांगानुष्ठानादशु॰

क्षयेज्ञानदीप्तिराविवेकख्यातेः २८ योगांगान्यष्टाव
भिधायिष्यमाणानितेषामनुष्ठानात्पंचपर्वणोवि
पर्ययस्याशुद्धिरूपस्यक्षयोनाशः तत्क्षयेसम्यग्ज्ञानस्या
भिव्यक्तिः यथायथासाधनान्यनुष्ठीयंतेतथातथा
तनुत्वमशुद्धिरापद्यतेयथायथाचक्षीयतेतथातथा
क्षयक्रमानुरोधिनीज्ञानस्यापिदीप्तिर्विवर्धतेसा
खल्वेषाविवृद्धिःप्रकर्षमनुभवत्याविवेकख्यातेःआगु
णपुरुषस्वरूपविज्ञानादित्यर्थः योगांगानुष्ठानमशु
द्धेर्वियोगकारणं यथापरशुःछेद्यस्यविवेकख्यातेस्तु
प्राप्तिकारणं यथाधर्मःसुखस्यनान्यथाकारणं
कतिचैतानिकारणानिशास्त्रेभवंति नवैवेत्याह तद्
यथा उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः
वियोगान्यत्वधृतयःकारणंनवधास्मृतमिति तत्र

मनो

पा॰ यो॰ त्पत्तिकारणं भवति विज्ञानस्य स्थितिकारणं मनसः पुरु
भा॰ षार्थता शरीरस्येवाहार इति अभिव्यक्तिकारणं यथा रू
२८ पस्यालोकः विकारकारणं मनसो विषयान्तरं यथाग्
28 निः पाक्यस्य प्रत्ययकारणं धूमज्ञानमग्निज्ञानस्य
प्राप्तिकारणं योगांगानुष्ठानं विवेकख्यातेः वियो
गकारणं तदेवाशुद्धेः अन्यत्वकारणं यथा सुवर्ण
स्य सुवर्णकारः एवमेकस्य स्त्रीप्रत्ययस्याविद्या मूढ
त्वे द्वेषो दुःखत्वे रागः सुखत्वे तत्त्वज्ञानं माध्यस्थ्ये धृति
कारणं शरीरमिन्द्रियाणां तानि च तस्य महाभूतानि
शरीराणां तानि च परस्परं सर्वेषां तैर्यग्यौनमानुषदै
वतानि च परस्परार्थत्वादित्येवं नव कारणानि तानि
च यथासंभवं पदार्थान्तरेष्वपि योज्यानि योगां
गानुष्ठानं तु द्विधैव कारणत्वं लभत इति तत्र यो

गांगान्युपवर्णयति यमनियमासनप्राणायामप्रत्याहारध्या

नधारणासमाधयोऽष्टावंगानि यथाक्रममेषामनुष्ठानं स्व

तत्र रूपं च वक्ष्यामः तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा य

माः २९ तत्राहिंसा सर्वदा सर्वथा सर्वभूतानामनभिद्रोहः

उत्तरे च यमनियमास्तन्मूलाः तत्सिद्धिपरतयैव तत्प्रति

पादनाय प्रतिपाद्यन्ते तदवदातरूपकरणायैवोपादीयन्ते

तथा चोक्तं स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि

समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो नि

वर्तमानस्तामेवावदातरूपामहिंसां करोति सत्यं यथार्थे

वाङ्मनसी यथादृष्टं यथानुमितं यथाश्रुतं तथा वाङ्मन

५९ श्चेति परत्र स्वबोधसंक्रान्तये वागुक्ता सा यदि न वञ्चिता भ्रा

श्री. न्ता वा प्रतिपत्तिवन्ध्या वा भवेत् इत्येषा सर्वभूतोपकारार्थं

पा. यो. प्रवृत्ता न भूतोपघाताय यदि चैवं भूतानामृतोपघा

चैवमप्यभिधी

पा॰ यो॰ नैवं स्यान्न सत्यं भवेत् पापमेव भवेत् तेन पुण्याभासेन पुण्य
शा॰ प्रतिरूपकेण कष्टं तमः प्राप्नुयात् तस्मात् परीक्ष्य सर्वभूतहितं
२६ सत्यं ब्रूयात् स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणं
तत्प्रतिषेधः पुनरस्पृहारूपमस्तेयमिति ब्रह्मचर्यं गुप्तेन्द्रि
यस्योपस्थस्य संयमः विषयाणामर्जनरक्षणक्षयसंगहिं
सादोषदर्शनादस्वीकरणमपरिग्रह इत्येते यमाः ते तु —
— — — कालसमयानवच्छिन्नाः सार्वभौमा महाव्रतं ३१ तत्रा
हिंसा जात्यवच्छिन्ना मत्स्यबंधकस्य मत्स्येष्वेव नान्यत्राहिं
सा देशावच्छिन्ना न तीर्थे हनिष्यामीति सैव कालावच्छिन्ना
न चतुर्दश्यां न पुण्येऽहनि हनिष्यामीति सैवा त्रिभिरुपरतस्य समयावच्छि
न्ना देवब्राह्मणार्थे नान्यथा हनिष्यामीति यथा च क्षत्रिया
णां युद्ध एव हिंसा नान्यत्रेति एभिर्जातिदेशकालसमयैरन
वच्छिन्ना अहिंसादयः सर्वथैव परिपालनीयाः सर्वभूमिषु

सर्वविषयेषु सर्वथैवाविदितव्यभिचाराः सार्वभौमा महाव्र
तमित्युच्यते ॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधाना
नि नियमाः ३२ तत्र शौचं मृज्जलादिजनितं बाह्यं अभ्य
न्तरं मैत्र्यादिभिश्चित्तमलानां प्रक्षालनं संतोषः
सन्निहितसाधनादधिकस्यास्पृहा तपः क्षुत्पिपासा
द्वंद्वः जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौना
कारमौने च व्रतानि यथायोगं कृच्छ्रचान्द्रायणसांत
पनादीनि स्वाध्यायो मोक्षशास्त्राणामध्ययनं प्रणा
वजपो वा ईश्वरप्रणिधानं तस्मिन्परमगुरौ सर्वकर्मा
३० र्पणं शय्यासनस्थोऽथ पथि व्रजन्वा स्वस्थः परिक्षीणवि
३१ तर्कजालः संसारबीजक्षयमीक्षमाणः स्यान्नित्यमुक्तोऽ
३१·३२ मृतभोगभागी यच्चेदमुक्तं ततः प्रत्यक्चेतनाधिगमो
प्यन्तरायाभावश्चेति एतेषां यमनियमानां वितर्कबाधने

पा॰यो॰ प्रतिपक्षभावनं ३३ यदास्य ब्राह्मणस्य हिंसादयो वितर्का जायेर
शा॰ न्हनिष्याम्यहमपकारिणमनृतमपि वक्ष्यामि द्रव्यमप्यस्य
२॰ स्वीकरिष्यामि दारेषु वास्य व्यवायी भविष्यामि परिग्रहेषु वा
स्य स्वामी भविष्यामीति एवमुन्मादप्रवणा वितर्कज्वरेणा
30 ति दीप्तेन बाध्यमानस्तत्प्रतिपक्षान्भावयेत् घोरेषु संसा
रांगारेषु पच्यमानेन मया शरणमुपागतः सर्वभूताभयप्र
दानेन योगधर्मः स खल्वहं त्यक्त्वा वितर्कान्पुनस्तानाददा
नः तुल्यः श्ववृत्तेनेति भावयेत् यथा श्वा वान्तावलेही तथा त्य
क्तस्य पुनराददान इत्येवमादि सूत्रान्तरेष्वपि योज्यं वितर्का हिं
सादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृ द्वि=
दुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनं
३४ तत्र हिंसा तावत्कृता कारितानुमोदितेति त्रिधा एकैका वि
पुनस्त्रिधा लोभेन मांसचर्मार्थेन क्रोधेनापकृतमनेनेति मो

हेतधर्मोमेभविष्यतीति लोभक्रोधमोहाः पुनस्त्रिविधामृदु
मध्याधिमात्रा इत्येवंसप्तविंशतिभेदाभवंतिहिंसायाः
मृदुमध्याधिमात्राः पुनस्त्रिधामृदुमृदुर्मध्यमृदुः ती
व्रमृदुरिति तथामृदुमध्योमध्यमध्यस्तीव्रमध्य इति
त थामृदुतीव्रोमध्यतीव्रोऽधिमात्रतीव्र इति एवमेकाशी
तिभेदाहिंसाभवतिसापुनर्नियमविकल्पसमुच्चयभेदा॰
दसंख्येयाप्राणभृद्भेदस्यापरिसंख्येयत्वादिति एवम
नृतादिष्वपियोज्यं तेखल्वमीवितर्काःदुःखाज्ञाना
नंतफलाइतिप्रतिपक्षभावनंदुःखमज्ञानंचानंतंफलं
येषामितिप्रतिपक्षभावनं तथाचहिंसकःप्रथमंता
वद्वध्यस्यवीर्यमाक्षिपतिततःशस्त्रादिनिपातेनदुःख
यतिततोजीवितादपिमोचयतीति ततोवीर्याक्षेपादस्य
चेतनाचेतनमुपकरणंक्षीणवीर्यंभवति दुःखोत्पाद

नान्नरकतिर्यक्प्रेतादिषु दुःखमनन्तं भवति जीवितव्य॥
पेतोपरप्राणप्राणिनां च जीवितान्यपि एव वर्तमानो मरण।
मि—च्छापि दुःखविपाकस्यानियतवेदनीयत्वात् कथं
विद्देवाशुसिमियादिवत्क पंचविद्गुणपावायगतमहिंसा
भवेन्नतत्फस्व प्राप्नोभवेदल्पायुरिति एवमनन्तवादि
षुपियोऽयंपयपासंभवं एवं वितर्काणां च परस्त्रैवागत
विपाकमनियमं भावयन्न वितर्केषु मनः प्रणीदधीत
प्रतिपक्षभावना हेतोर्याचितकायक्लासस्य सुरम्भसंवध
मदिताः नदानत्क्वतत्मै प्रचयोगिस्सा प्रसूचकं भवति
न घण्या अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः
३४ सर्वप्राणिनां भवति सत्यप्रतिष्ठायां क्रियाफला
श्रयत्वं ३५ धार्मिको भूया इति भवति धार्मिकः स्वर्ग
प्राप्नुहि इति स्वर्गं प्राप्नोति अमोघास्य वाग्भवति

मणिप्रतिष्ठायां सर्वरत्नोपस्थानं सर्वदिक्स्थान्यस्य
स्योपतिष्ठन्ते रत्नानि ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः
३६ कस्य लाभादप्रतिघातान्गुणानुत्कर्षयति सिद्धश्च
विनेयेषु ज्ञानमाधातुं समर्थो भवति अपरिग्रहस्थैर्ये
जन्मकथंतासंबोधः ३७ अस्य भवति कोऽहमासं कथ
महमासं किंस्विदिदं कथंस्विदिदं के वा भविष्यामः कथं
वा भविष्याम इत्येवमस्य पूर्वान्तपरान्तमध्येष्वात्मभाव
जिज्ञासा स्वरूपेणोपावर्तते एता यमस्थैर्ये सिद्धयः
नियमेषु वक्ष्यामः शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः स्वा
ङ्गे जुगुप्सायां शौचमारभमाणः कायावद्यदर्शी काया
नभिष्वङ्गी यतिर्भवति किंच परैरसंसर्गः कायस्वभावा
वलोकी स्वमपि कायं जिहासुर्मृज्जलादिभिराक्षालयन्नपि
कायशुद्धिमपश्यन्कथं परकायैरत्यन्तमेवाप्रयतैः संसृज्येत

पा॰ यो॰ किंच सत्वशुद्धिसौमनस्यैकाग्र्येंद्रियजयात्मदर्शनयोग्यत्वानि
प्रा॰ च भवंतीति वाक्यशेषः ४१ शुचेः सत्वशुद्धिः ततः सौमनस्यं
३२ ततः ऐकाग्र्यं ततः इंद्रियजयः ततश्चात्मदर्शनयोग्यत्वं बुद्धिस
32 त्वं भवतीति एते शौचस्य स्थैर्यादपि गम्यंत इति संतोषादनुत्त
मस्सुखलाभः ४२ तथोक्तं यच्च कामसुखं लोके यच्च दिव्यं
महत्सुखं तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामि
ति कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः ४३ निर्वर्त्यमान
मेव तपो हिनस्त्यशुद्ध्यावरणमलं तदावरणमलापगमात्
कायसिद्धिरणिमाद्या तथेंद्रियसिद्धिर्दूराच्छ्रवणदर्शना
द्येति स्वाध्यायादिष्टदेवतासंप्रयोगः ४४ देवता ऋ
षयः सिद्धाश्च स्वाध्यायशीलस्य दर्शनं गच्छंति कार्ये चा
स्य वर्तंते इति समाधिसिद्धिरीश्वरप्रणिधानात् ४५
ईश्वरार्पितसर्वभावस्य समाधिसिद्धिर्यया सर्वमीप्सित

भवति यं ज्ञाना ति देशांतरे देहांतरे कालांतरे च ततोऽस्यम
ज्ञायथा भूतभजानानीति उक्ताः सहसिद्धिभिर्यमनियमाः
आसनादीनि वदन्याः तत्र स्थिरसुखमासनं ४५
तद्यथा पद्मासनं वीरासनं भद्रासनं स्वस्तिकं दण्डासनं सो
पाश्रयं पर्यंकः क्रौंचनिषदनं हस्तिनिषदनं उष्ट्रनिष
दनं समसंस्थानं स्थिरसुखं यथासुखं चेत्येवमादि प्र
यत्नशैथिल्यानन्तसमापत्तिभ्यां ४६ भवतीति वाक्य
शेषः प्रयत्नोपरमात्सिध्यत्यासनं येन नांगमेजयो भव
ति अनंते वा समापन्नं चित्तमासनं निर्वर्तयतीति ततो
द्वंद्वानभिघातः ४७ शीतोष्णादिभिर्द्वंद्वैरासनजयान्नाभिभू
यते तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः
४८ सत्यासने बाह्यस्य वायोराचमनं श्वासः कौष्ठ्यस्य वायो
निःसारणं प्रश्वासः तयोर्गतिविच्छेदः उभयाभावः प्राणा

पा॰ यो॰ यूमैः सू॰ बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परि
शा॰ दृष्टोदीर्घसूक्ष्मः ५० यत्रश्वासपूर्वकोगत्यभावः सबाह्
३३ यः यत्रप्रश्वासपूर्वकोगत्यभावः सआभ्यंतरः तृतीय
33 स्तंभवृत्तिर्यत्रोभयाभावः सकृत्प्रयत्नाद्भवति यथातप्तेन्य
स्तमुपलेजलसर्वतः संकोचमापद्यते तथोद्वयोर्युगप
द्गत्यभावइति त्रयोप्येतेदेशेनपरिदृष्टाः इयानस्यविष
योदेशइति कालेनपरिदृष्टाः क्षणानामियत्तावधारणे
नावच्छिन्नाइत्यर्थः संख्याभिःपरिदृष्टाःएतावद्भिः श्वास
प्रश्वासैःप्रथमउद्घातः तद्वन्निगृहीतस्यैतावद्भिर्द्वितीय
उ—तः एवंतृतीयः एवंमृदुः एवंमध्यः एवंतीव्रइति
संख्यापरिदृष्टः सखल्वयमेवमभ्यस्तोदीर्घसू॰ बाह्या
भ्यंतरविषयाक्षेपीचतुर्थः ५१ देशकालसंख्याभिर्बाह्य
विषयपरिदृष्टआक्षिप्तः तथाभ्यंतरपरिदृष्टविषयक्ता

ष्टिः उभयथा दीर्घसूक्ष्मः तत्पूर्वको भूमिजयात्क्रमे
णोभयोर्गत्यभावश्चतुर्थः प्राणायामः तृतीयस्तु
विषयानालोचितो गत्यभावः सकृदारब्ध एव देश
कालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः चतुर्थस्तु श्वास
प्रश्वासयोर्विषयावधारणात् क्रमेण भूमिजयादु
भयाक्षेपपूर्वकको गत्यभावश्चतुर्थः प्राणायाम इत्य
शे यं विशेष इति ततः क्षीयते प्रकाशावरणं ५२ प्राणायामा
नभ्यस्यतोस्य योगिनः क्षीयते विवेकज्ञानावरणीयं
कर्म यत्तदाचक्षते महामोहमयेनेन्द्रजालेन प्रकाशशीलं
सत्वमावृत्य तदेवाकार्ये नियुंक्त इति तदस्य प्रकाशाव
रणं कर्म संसारनिबंधनं प्राणायामाभ्यासाद् दुर्बलं भवति प्रति
क्षणं च क्षीयते तथा चोक्तं तपो न परं प्राणायामात्ततो विशु
द्धिर्मलानां दीप्तिश्च ज्ञानस्येति किंच धारणासु च योग्यता

पा॰ यो॰ मनसः ५२ प्राणायामाभ्यासादेव प्रच्छर्दनविधारणाभ्यां
प्रा॰ वा प्राणस्येति वचनात् अथ कः प्रत्याहारः स्वविषया
३४ संप्रयोगे चित्तस्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहारः ५३
स्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इवेति चि
त्तनिरोधे चित्तवन्निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवदु
पायान्तरमपेक्षन्ते यथा मधुकरराजं उत्पतन्तं मक्षिकाः
उत्पतन्ति निविशमानमनुविशन्ति तथेन्द्रियाणि
चित्तनिरोधे निरुद्धानीत्येष प्रत्याहारः ततः परमा व
श्यतेन्द्रियाणां ५४ शब्दादिष्वव्यसनमिन्द्रियजय इति के
चित् सक्तिर्व्यसनं व्यस्यत्येनं श्रेयस इति अविरुद्धा प्रति
पत्तिर्न्याय्या शब्दादिसंप्रयोगः स्वेच्छयेत्यन्ये रागद्वेषा
भावे सुखदुःखशून्यं शब्दादिज्ञानमिन्द्रियजय इति केचि
त् चित्तैकाग्र्यादप्रतिपत्तिरेवेति जैगीषव्यः ततश्च परमा त्वियं

वश्यता परस्मिन्नानिरोधे नित क्रान्तीन्द्रियाणामनेनेन्द्रियजयफलमु
पन्नक्लेशमुपायान्तरमपेक्षन्ते योगिन इति ५५ इति पातं
जले साधननिर्देशो नाम द्वितीयः पादः २ उक्तानि पंचब
हिरंगानि साधनानि धारणादित्रयं वक्तव्य देशबन्धश्चित्तस्य
धारणा नाभिचक्रे हृदयपुंडरीके मूर्ध्नि ज्योतिषि नासि
काग्रे जिह्वाग्र इत्येवमादिषु देशेषु बाह्ये वा विषये चित्तस्य
वृत्तिमात्रेण बंधो धारणा तत्र प्रत्ययैकतानता ध्यानं
तस्मिन्देशे ध्येयालंबनस्य प्रत्ययस्य एकतानता सदृ
शः प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानं २ तदेवार्थमा
त्रनिर्भासं स्वरूपशून्यमिव समाधिः ध्यानमेव ध्येयाका
रनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति
ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते ३ त्रयमेकत्र
संयमः तदेतद्धारणाध्यानसमाधित्रयमेकत्र संयमः ४

पा॰ यो॰ कविषयाणि त्रीणि साधनानि संयम इत्युच्यते तद
भा॰ स्य त्रयस्य तान्त्रिकी परिभाषा संयम इति ४ तज्जयात्प्र
३५ ज्ञालोकः तस्य संयमस्य जयात्समाधिप्रज्ञाया भव
35 त्यालोको यथा यथा संयमः स्थिरपदो भवति तथा त
था समाधिप्रज्ञा विशारदी भवति ५ तस्य भूमिषु
विनियोगः तस्य संयमस्य जितभूमेर्यानन्तरा भूमि
स्तत्र विनियोगः नह्यजिताधरभूमिः अनन्तरभूमिं
विलङ्घ — — प्रा — न्तभूमिषु — — — — — — — ति तद
स्य प्रज्ञालोकः जितोत्तरभूमिकस्य — नाधरभूमि
— — — — — — ज्ञा — — — — — संयमो युक्तः कस्मात्तदर्थस्य
न्यत एवावगतत्वात् भूमेरस्या इयमनन्त — — — — — —
— — — — — — — पाध्य — — — — — एवं ह्युक्तं योगेन योगो ज्ञा
तव्यो योगो योगात्प्रवर्तते — — — — — — — — — — — —

पेत्मत्रोचितमिति ६ त्रयमंतरंगंपूर्वेभ्यः तदेतत्त्र — ध्या
नसमाधित्रयमंतरंगं — — — — — — समाधेः पूर्वेभ्यः — —
मादिभ्यः पंचभ्यः साधनेभ्य इति ७ त — पि बहिरंगंनि
र्बी — स्य — — — तरंगंसा[illegible]त्रयंनिर्बी — — — — ग
— बहिरंगंभवति कस्मात्तदभावेभावादिति ८ अथनि
रो — — चित्तक्षणेषु चलंगुणवृत्तमिति कीदृशस्तदाचि
त्तपरिणामः व्युत्थान — — — संस्कारयोरभिभवप्रादुर्भावौनिरो
धक्षणचित्ता — न्वयोनिरोधपरिणामः व्युत्थानसंस्कारश्चि
त्तधर्मा न ते प्रत्ययात्मका इति प्रत्यय — निरोधे न निरुद्धाः निरो
धसंस्कारा अपि चित्तधर्मास्तयोरभिभवप्र — भावौ व्युत्थान
संस्कारा हीयन्ते निरोधसंस्कारा आधीयन्ते निरोधक्षणं
चित्तमन्वेति तदेकस्य चित्तस्य प्रतिक्षणमिदं संस्कारान्यथा
त्वं निरोधपरिणामः तदा संस्कारशेषं चित्तमिति निरोधस

माधीयाव्याख्याते तस्य प्रशान्तवाहिता संस्कारात् विरो
धसंस्कारास्यास पाटवापेक्षा प्रशान्तवाहिता चित्तस्य ने
पति तत्संस्कारमांद्ये व्युत्थानधर्मिणा संस्कारेण निरो
धर्मसंस्कारोभिभूयत इति १० सर्वार्थतैकाग्रतयोः क्षयो
दयो चित्तस्य समाधिपरिणामः ११ सर्वार्थता चित्तधर्मः
एकाग्रतापि — धर्मः सर्वार्थतायास्तयास्तिरोभाव इत्यर्थः
एकाग्रताया उदय आविर्भाव इत्यर्थः तयोर्धर्मित्वेनानुगतं
चित्तं तदिदं चित्तमपायोपजनयोः स्वात्मभूतयोर्धर्मयोरनु
गतं समाधीयते स — — — समाधिपरिणामः ततः — पुनः
शान्तोदितौ — प्रत्ययौ चित्तस्यैकाग्रतापरिणामः समाहि=
तचित्तस्य एव प्रत्ययः शान्त उत्तरस्तत्सदृश उदितः समा
धिचित्तमुभयोरनुगतं पुनस्तथैवासमाधिभ्रेषादिति
स खल्वयं धर्मिणः चित्तस्य एकाग्रतापरिणामः १२

नभूतेंद्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः
एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्था
रूपेण भूतेंद्रियेषु धर्मपरिणामो लक्षणपरिणामोऽव
स्थापरिणामश्च ---------- व्युत्थाननिरोधयो
र्धर्मयोरभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामो
लक्षणपरिणामश्च निरोधस्त्रिलक्षणः त्रिभिरध्वभिर्युक्त
— स खल्वनागतलक्षणमध्वानं प्रथमं हित्वा ---- न
तिक्रान्तो वर्तमानलक्षणं प्रतिपन्न ---- स्वरूपेणाभिव्य
क्तिः एषोऽस्य द्वितीयोऽध्वा --- नागतातीताभ्यां लक्षणाभ्यां
वियुक्तः तथा --- नं त्रिलक्षणं त्रिभिरध्वभिर्युक्तं व
३० र्तमानं लक्षणं हित्वा धर्मत्वमनतिक्रान्तं अतीतलक्षणं प्र
८८ तिपन्नं एषोऽस्य तृतीयोऽध्वा नागतवर्तमानाभ्यां
८. ९. लक्षणाभ्यां वियुक्तं एवं पुनर्व्युत्थानमुपसम्पद्यमानमना

पा॰ यो॰ गतलक्षणं हित्वा धर्मत्वमनतिक्रांतं वर्तमानलक्षणं प्र
या॰ तिपन्नं यत्रास्य स्वरूपेणाभिव्यक्तौ सत्यां व्यापारः एषोऽस्य
३७ द्वितीयोऽध्वा न चातीतानागताभ्यां लक्षणाभ्यां वियुक्त
इति एवं पुनर्निरोधः एवं पुनर्व्युत्थानमिति तथाव
37 स्थापरिणामः निरोधलक्षणोभाविनिरोधसंस्कारा बलवं
तो भवंति दुर्बला व्युत्थानसंस्कारा इति एष धर्माणाम
वस्थापरिणामः तत्र धर्मिणो धर्मैः परिणामो धर्मा
णां त्र्यध्वनां लक्षणैः परिणामो लक्षणानामप्यवस्था
भिः परिणाम इति एवं धर्मलक्षणावस्थापरिणामैः शू
न्यं न क्षणमपि गुणवृत्तमवतिष्ठते चलं च गुणवृत्तं
गुणस्वाभाव्यं तु प्रवृत्तिकारणमुक्तं गुणानामिति
एतेन भूतेन्द्रियेषु धर्मधर्मिभेदात्त्रिविधपरिणामो
वेदितव्यः परमार्थतस्तु एक एव परिणामो धर्मिस्वरूपमा

आह धर्मो धर्मिविक्रियैवैषा धर्मद्वारा प्रपंच्यत इति तत्र धर्मस्य
वर्त्त= धर्मिणि वर्त्तमानस्याध्वस्वतीतानागतवर्त्तमानेषु भावा
न्यथात्वं भवति न द्रव्यान्यथात्वं यथा सुवर्णभाजनस्य भि
त्त्वान्यथा क्रियमाणस्य भावान्यथात्वं भवति न सुवर्णान्यथा
त्वमिति अपर आह धर्मानभ्यधिको धर्मी पूर्वतत्त्वा
नतिक्रमात् पूर्वापरावस्थाभेदमनुपतितः कौटस्थ्येन विपरि
वर्त्तेत यद्यन्वयी स्यादिति --- दोषः कस्मात् एकांतता
नभ्युपगमात् तदेतत्त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रति
षेधात् अपेतमप्य---शप्रतिषेधात् संसर्गाच्चास्य सौ
क्ष्म्यं सौक्ष्म्याच्च--पलब्धिरिति लक्षणपरिणामो धर्मोऽ
ध्वसु --- अतीतोऽतीतलक्षणयुक्तोऽनागतवर्त्तमा
नाभ्यां लक्षणाभ्यामवियुक्तः तथानागतोऽनागतल
क्षणयुक्तो वर्त्तमानातीताभ्यां लक्षणाभ्यामवियुक्तः —

पा० यो० वर्त्तमानोवर्त्तमानलक्षणयुक्तोनागतस्तैस्ताभ्यांल
वृ० क्षणाभ्यामविमुक्त इति यथापुरुष ए--- स्त्रियांरक्तो
३८ नशेषास्वविरक्तोभवतीति अत्रलक्षणपरिणामे सर्वस्य
38 सर्वलक्षणयोगादध्व---रःप्राप्नोतीतिपरैर्दोषस्त्वापाद्यतइ
तितस्यपरिहारः धर्मिणां धर्मत्वमप्रसाध्यं सतिचधर्म---
लक्षणभेदोपिवाच्योनवर्त्तमानसमयएवास्यधर्मत्वं एवंहि
नचित्तंरागधर्मकंस्यात्क्रोधक---रागस्यासमुदाचारादि
ति त्रयाणांलक्षणानांयुगपदेकस्यांव्यक्तौनास्तिसं
भव क्रमेण--- जकाञ्जनस्यभावोभवेदिति उक्तंच
रूपातिशयावृत्त्यतिशयाश्चविरुध्यन्ते सामान्यानि---
शयैःसहवर्त्तन्ते तस्मादसंकरः यथारागस्यैवक्वचित्समु
५५= दाचारइतिनतदानीमन्यत्राभावः किंतुकेवलंसामान्ये
नसमन्वागतइतिअस्तितदातत्रतस्यभावः तथालक्ष

रास्येति न धर्मी त्र्यध्वा धर्मास्तु त्र्यध्वानस्ते लक्षिता अल
क्षिताश्च तत्र लक्षिताः तां तामवस्थां प्राप्नुवंतो ऽन्यत्वे
न प्रतिनिर्दिश्यंते ऽवस्थांतरतो न द्रव्यांतरतः यथै
का रेखा शतस्थाने शतं दशस्थाने दश एका चैकस्था
ने यथा चैकत्वेपि स्त्री माता चोच्यते दुहिता च स्वसा चेति
अवस्थापरिणामे कौटस्थ्यप्रसंगदोषः कैश्चिदुक्तः कथ
मध्वनो व्यापारेण व्यवहितत्वात् यदा धर्मः स्वव्यापारं
न करोति तदा ऽनागतः यदा करोति तदा वर्तमानः यदा कृ
त्वा निवृत्तस्तदातीत इत्येवं धर्मधर्मिणोर्लक्षणानामवस्था
नां च कौटस्थ्यं प्राप्नोतीति परैः दोष उच्यते नासौ दोषः
कस्माद् गुणिनित्यत्वेपि गुणानां विमर्दवैचित्र्यात् य
था संस्थानमादिमद्धर्ममात्रं शब्दादीनां विनाश्यविना
शिनां एवं लिंगमादिमद्धर्ममात्रं सत्वादीनां गुणानां वि

पा. यो. नाशयाविनाशिनां तस्मिंस्त्विकाधापज्ञोमितन्त्रे — दम
सू. दाहरणं मृद्धर्मी पिंडाकाराद्धर्माद्धर्मान्तरमुपसंपद्य
३९ मानोधर्मतः परिणमते घटाकारइति घटाकारोऽना
गतलक्षणं हित्वा वर्तमानलक्षणं प्रतिपद्यत इति लक्ष
39 णतः परिणमते घटोनवपुराणतां प्राप्नुवन्नवस्थामनुभव
न्नवस्थापरिणामं प्रतिपद्यत इति धर्मिणोपि ध
र्मान्तरमवस्थाधर्मस्यापि लक्षणान्तरमवस्थेत्येक एव
परिणामोभेदेनोपदर्शित इति एवं पदार्थान्तरेष्वपि योज्य
मिति न एते धर्मलक्ष

तस्यास्तिक्रमः कस्मात्

„ध्यानसमाधित्रयमेक„ वीपिस्तापोस्त्वासमनंतरत्वंस्तात्नास्ति
क्वतीतस्य तस्माद्वयोरेव धर्मलक्षणयोः क्रमः तथावस्था –
– – क्रमोपि घटस्याभिनवस्य प्रांते पुराणता दृश्यते सच
लक्षणा धर्मधरानुपातिनाक्रमेणाभिव्यक्ता – – सोपरा व्यक्ति
माप द्यत इति धर्मलक्षणाभ्यां चाविशिष्टो यं तृतीयः परि
क्रमा णाम इति तएते धर्मधर्मिभेदे सति प्रतिलब्धस्वरूपा धर्मा
पि धर्मीभवत्यन्य धर्मस्वरूपापेक्ष – – यदा तु परमार्थतो
धर्मिणि क्रमेदोपचार द्वारे – – – एवाभिधीयते धर्मस्तदा
यमेकत्वेनैव क्रमः प्रत्ययभरसन्तो चित्तस्य द्वये धर्माः परिदृष्टा
श्चाप – – – – – – – – प्रत्ययात्मकाः परिदृष्टाः वस्तुमात्रात्मका
श्चापरिदृष्टाः नेच सप्तैव भवंति अनुमानेन प्रापि – – – –
त – – – – – ः निरोध धर्मसंस्काराः परिणामोथ जीवनं
चेष्टाशक्तिश्च चित्तस्य धर्मादर्शनवर्जिताः इति श्च – – –

पा. यो. नउपात्तसर्वसाधनस्यबुभुत्सितार्थप्रतिपत्तयेसंयमस्य
शा. विषयउपक्षिप्यते १५ परिणामत्रयसंयमादतीताना
४२ गतज्ञानं धर्मलक्षणावस्थापरिणामेषुसंयमाद्योगि
नोभवत्यतीतानागतज्ञानं धारणाध्यानसमाधित्रय
41 मेक — संयमउक्तास्तेनपरिणामत्रयंसाक्षात्क्रियमाणम
पा २ तीतानागतज्ञानंतेषुसंपादयति १६ शब्दार्थप्रत्ययानामि
तरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूत — —
रुतज्ञानं तत्रवागवर्णेष्वेवार्थवती श्रोत्रंचध्वनिपरिणाममा
त्रविषयं पदंपुनर्वा — — संहारबुद्धिनिर्ग्राह्यमिति वर्णा
एकसमयासं — — — भवित्वात्परस्परनिरनुग्रहात्मान — —
मस्त — — पदमसंस्पृश्यानुपस्थाप्याविर्भूतास्तिरोभूताश्चेतिप्र —
— — त्येकमपदस्वरूपाउच्यन्ते — — — — — — — — — — — न
सर्वाभिधानशक्तिप्रचितःसहकारित्वरांतर — — योगित्वा

=रा=

ते वैय्यक्तत्पत्ति --- तां पूर्वस्मकुरत्नरेसु --- ताम्मत्पूर्वैवर्णाविदोवे

भावस्यारोपितत्वत्येवं व --- वर्णाः क्रमानुरोधितोर्थसं

केते तामछिन्नः इ यंतपतेसर्वाणि आतशक्तिपरिकृत्वागका

मै ---- ईर्तीयाः सस्ताहिसंतम पंघेतपंतात्रि त्त

देतैषामर्थसंकेतेनावछिन्नानाम -------- ति --

-- पायप --- बुद्धिनिर्भासितत्तत्पदवाचकं वाच्यस्यसंकेतै

ते तदेकं पदं एकबुद्धिविषयः एकप्र ------- भा

गमक्रमनमवर्णाहि द्वन्त्यवर्णप्रत्ययव्यापारोपस्थापितं

परत्रप्रतिपिपादयिषया वर्णैरक --- यमानैः श्रूयमा

णैश्वश्रोतृभिरनादिवाग्व्यवहारवासनानुविद्धयालोक

२४ बुध्यमानैः स्वर्वसंप्रतिपत्त्य --- यते तस्यसंकेतबुद्धितः

सू. प्रविभागः एतावतामेवजातीयकोनुसंहार एकस्यार्थस्य

स. ग्र. वाचकइति संकेतस्तु पदपदार्थयोरितरेतराध्यासरू

पः स्फोटात्मकः योयंशब्दः सोयमर्थः योर्थः स शब्द इति — व
मितरेतराध्यासरूपः संकेतो भवतीत्येवमेते शब्दार्थप्रत
याइतरेतराध्यासात्संकीर्णाः गौरिति — शब्दो गौरित्यर्थो गौ
रितिज्ञानं य एषां प्रविभागज्ञः स सर्ववित्सर्वपदेषु चास्ति
वाक्यशक्तिः वृक्षइत्यु — क्तेस्तीति गम्यते न सत्तां पदार्थो
व्यभिचरतीति तथा नह्यसाधना क्रियास्तीति तथाच पच
तीत्युक्ते — — कारकाणामाक्षेपो नियमार्थोनुवादः कर्तृ
करणकर्मणां चैत्राग्नितंडुलानामिति दृष्टं च व — — र्थे
पदरजनं श्रोत्रियश्छन्दोधीते जीवति प्राणान्धारयति
तत्र वाक्ये पदपदार्थाभिव्यक्तिः त — पदं प्रविभज्य व्याक
रणीयं क्रियावाचकं कारकवाचकं वा अन्यथा भवत्य
श्वोऽजापय इत्येवमादिषु नामाख्यातसारूप्यादनिर्ज्ञातं
कथं क्रियायां कारके वा व्याक्रियेतेति तेषां शब्दार्थप्रत्ययाः

यानांसविभागः तथ्यस्मा तेनेप्रासाद इति क्रियार्थः श्वेतः
प्रासाद इति कारकार्थः शब्दः क्रियाकारकात्मा तदर्थः प्र
त्ययश्च कस्मात् सोयमित्यभिसंबंधादेकाकार एक
प्रत्ययः संकेत इति यस्तु संकेतोर्थः स शब्दप्रत्यययोरालंब
नीभूतः साहित्याभिरवस्थाभिर्विक्रियमाणो न शब्दसहगतो रागो
न बुद्धिसहगतः एवं शब्द एवं प्रत्ययो नेतरेतरसहगत इ
ति अन्यथार्थोन्यथा शब्दोन्यथा प्रत्यय इति वि
भागः एवं तत्प्रविभागसंयमाद्योगिनः सर्वभूतरुतज्ञानं संपद्य
त इति १७ संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं — द्वये ख
ल्वमी संस्काराः स्मृतिक्लेशहेतवो वासनारूपाः विपाकहे
तवो धर्माधर्मरूपास्ते पूर्वभवेषु अभिसंस्कृताः परिणामचे
ष्टानिरोधशक्तिजीवनधर्मवदपरिदृष्टाश्चित्तधर्मास्ते
षु संयमः संस्कारसाक्षात्क्रियायै समर्थः न च देशकाल

पा॰ यो॰ निमित्तानुभवैर्विना न ते भवन्ति ---- त्करणान्दृष्टं सं
शा॰ स्कारसाक्षात्करणात्पूर्वजातिज्ञानमुत्पद्यते योगिनः
४३ परत्राप्येवमेव संस्कारसाक्षात्करणात्परजातिज्ञानं
43 अत्रेदमाख्यानं श्रूयते भगवतो जैगीषव्यस्य संस्कारसा
क्षात्क ---- दशसु ---- सर्गेषु जन्मपरिणाममनुपश्यतो
विवेकजं ज्ञानं प्रादुरभवत् अथ भगवानावट्य ---- तनुधर
स्तमु ---- दशसु सर्गेषु भव्यत्वादनभिभूतबुद्धिसत्वेन त्व
या नरकतिर्यग्गर्भसंभवं दुःखं संपश्यता देवमनुष्ये
न नः पुनरुत्पद्यमानेन सुखदुःखयोः किमधिकमुपलब्धमि
गी ति भगवन्तमावट्यं जैगीषव्य उवाच ---- दशसु महासर्गेषु भव्यत्वादन
भिभूतबुद्धिसत्वेन मया नरकतिर्यग्भवं दुःखं संपश्यता देवम
नुष्ये ---- पुनरुत्पद्यमानेन यत्किंचिदनुभूतं तत्सर्वं दुःख
मेव प्रत्यवैमि भगवानावट्य उवाच यदि ---- मायुष्मतः

धातवाशित्वमनुत्तमं च संतोषसुखं किमिदमपि दुःखपक्षे निक्षि
प्तमिति भगवान् ——— उवाच विषयसुखापेक्षयैवेदमनुत्त
मं संतोषसुखमुक्तं कैवल्यपेक्षया दुःखमेव बुद्धि—— मायं धर्म
स्त्रिगुणास्त्रिगुणाश्च प्रत्ययास्ते हेयपक्षे न्यस्ता इति दुःखरूपान्तःपा
तस्माद्दुःखसंताप—— मात्मप्रसन्नमबाधं सर्वानुकूलं सुखमिह
मुक्तामिति १८ प्रत्ययस्य परचित्तज्ञानं प्रत्यये संयमात्प्रत्यय
स्य साक्षात्करणात्ततः परचित्तज्ञानं १९ न च तत्सालंबनं त
स्याविषयीभूतत्वात् रक्तं प्रत्ययं जानाति कस्मिन्नालंबने
रक्तमिति न जानाति परप्रत्ययस्य यदालंबनं तद्योगिचित्ते
न तेनालंबनीकृतं परप्रत्ययमात्रं तु योगिचित्तस्यालंबनी
४३ भूतमिति २० कायरूपसंयमात्तद्ग्राह्यशक्तिस्तंभे चक्षुःप्र
काशासंयोगेन्तर्धानं कायस्य रूपे संयमात् रूपस्य ग्राह्यशक्ति
५१. स्तं प्रतिबध्नाति ग्राह्यशक्तिस्तंभे सति चक्षुःप्रकाशा क

पा॰ यो॰ भा॰ ४४
४४

55

—तज्ज्ञानमुत्पद्यते योगिनः एतेन शब्दाद्यंतर्द्धानमुक्तं वेदि
तव्यं २२ सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञान
मरिष्टेभ्यो वा आयुर्विपाकं कर्म द्विविधं सोपक्रमं निरुपक्र
———मं च यथार्द्रं वस्त्रं वितानितं लघीयसा कालेन शुष्ये
त्तथा सोपक्रमं यथा च तदेव संपि—ण्डितं चिरेण संशुष्ये
देवं निरुपक्रमं यथा चाग्निः शुष्के कक्षे मुक्तो वातेन स
मंततो युक्तः क्षेपीयसा कालेन दहेत्तथा सोपक्रमं यथा
वा स एवाग्निस्तृणराशौ क्रमशो— वयवेषु न्यस्तश्चिरेण
दहेत्तथा निरुपक्रमं तदैकभविकमायुष्करं कर्म द्विविधं
सोपक्रमं निरुप—मं च तत्संयमादपरांतस्य प्रायणस्य ज्ञानं
अरिष्टेभ्यो वेति त्रिविधमरिष्टं आध्यात्मिकमाधिभौतिक
——धिदैविकं चेति तत्राध्यात्मिकं घोषं स्वदेहे पिहित
कर्णो न शृणोति ज्योतिर्वा नेत्रेऽवष्टब्धे न पश्यति —तथा

आधिभौतिकंयमपुरुषान्तिप्रयान्तीपितृन्तन्तीनानागता
नकस्मादिति आधिदैविकंत्र --- कस्मात्तिचुद्गाल्वापयय
तिविपर्ययंवा सर्वमीति अनेनवाज्ञातानातित्र्यपरान्तज्ञानम्
इत्यत्तमिति -- मैत्र्यादिषुबला ---- कस्याम्भुदितेति
निस्त्रोभावनास्तत्रभूतेषु सुखितेषु --- भाव --- मैत्रीब ८
लंलभन्तेदुःखि --- तेषाकरुणाभावयित्वाकरुणाबलंलभते
पुण्यशीलेषुमुदितांभ --- त्वामुदिताबलंलभन्ते ---
समाधिर्वःसंयमः ततोबलान्यवंध्यवीर्याणिजायन्ते
पाप --- षुउपेक्षानतुभावना ततश्चनतस्यां --- समाधि
रिति अतोनबलमुपेक्षातःतत्रसंयमा --- इति स्तु बले
२९ षुहस्तिबलादीनि हा --- लेसंयमाद्धस्तिबलोभवति वैनते
३३ यबलेसंयमा --- त्तेयबलोभवति वायुबलेसंयमाद्वायु
३३· ३३· --- र्येवमादि २४ प्रवृत्त्या लोकन्यासात्सूक्ष्मव्यव

पा॰ यो॰ विप्रकृष्टज्ञानं ज्योतिष्मती प्रवृत्तिरुक्ता मनसस्तस्य यआलो
शा॰ कस्तं योगी सूक्ष्मे वा व्यवहिते वा विप्रकृष्टे वार्थे विन्यस्य तमर्थम
४४ धिगच्छति २५ भुवनज्ञानं सूर्ये संयमात् तत्प्रस्तारः सप्तलोकाः
४५ तथा — चेः प्रभृति मेरुपृष्ठं यावदित्येवं भूर्लोकः मेरुपृष्ठाद
45 रभ्याध्रुवाद्ग्रहनक्षत्रताराविचित्रोंतरिक्षलोकः ततः परः
स्वर्लोकः पंचविध — — ह्रेंद्रस्तृतीयो लोकः चतुर्थः प्राजापत्यो
महर्लोकः त्रिविधो ब्राह्मः तद्यथा जनलोकस्तपोलोकः स
त्य — — इति ब्राह्मस्त्रिभूमिको लोकः प्राजापत्यस्ततो महा
न् माहेंद्रश्च स्वरित्युक्तो दिवि तारा भुवि प्रजा इति संग्रहश्लो ग
कः तत्रावीचेरुपर्यु — — निविष्टाः षण्महानरकभूमयः
घ — — — सलिलानलानिलाकाशतमः प्रतिष्ठा महाकालांबरी
षरौरवमहारौरवकालसूत्रांध — — — — :यत्र स्वकर्मोपा
र्जितदुःखवेदनाः प्राणिनः कष्टमायुर्दीर्घमाक्षिप्य जायंते

ततः महातलरसातललातलसुतलवितलतलातलपाताला
ख्यानिसप्तपातालानि भूमिरियं पृथ्वी सप्तद्वीपावरुमनीय यम
स्याः सुमेरुर्मध्ये पर्वतराजः कांचनः तुल्यराजतवैडूर्यसमु
ट त्रिकूटहेममणिमयानिशृंगाणि तत्रवैडूर्यप्रभानुरागान्नी
लोत्पलपत्रश्यामोनभसोदक्षिणभागः अश्वितं रवेः स्वच्छप
श्चिमः कुरंटकाभोउत्तरः --- पार्श्वेचास्यजंबूः ततोयंजंबू
द्वीपः तस्यस्त --- रात्रात्रिंदिवंलग्नामिवविवर्तते तस्यतो
ले --- वंतउदीचीनास्त्रयःपर्वताः विसहस्राय --- नदंत
रेषुत्रीणिवर्षाणिनवनवयोजनसहस्र --- मत्राकोहिरम
यउत्तराकुरवश्चतिनिषध --- कूटहिमशैलादादिवातोहिसह
स्रायामाः तद --- षुत्रीणिवर्षाणिनवनवयोजनसहस्रा
-- हरिवर्षकिंपुरुषभारताख्यानिति सुमेरोः प्राचीनाः भद्राश्व
माल्यवत्समानः प्रतीचीनाः केतुमाल --- गंधमादनसीमा

पा॰ यो॰
शा॰
४८

48

श्री=

नः मध्ये पृथ्वीमिलावृतं तदेतद्योजनशतसहस्रं सुमेरोर्दि
शिदिशितदर्द्धेन व — सखल्वयं शतसहस्रायामो जंबूद्वी
पः ततो द्विगुणेन लवणोदधिना वलयाकृतिना वेष्टितः —
—— द्विगुणा द्विगुणाः शाककुशक्रौंचशाल्मलगोमेध
पुष्करद्वीपाः समुद्राश्च सर्षपराशिकल्पा —— विचित्रशैलाव
तंसाः इक्षुरससुरासर्पिर्दधिमंडक्षीरस्वादूदकसमुद्रपरिवेष्टि
ताः वलयाकृतयो लोकालोकपर्वतपरिवाराः पंचाशद्योजन
कोटिपरिसंख्याताः तदेतत्सर्वं सुप्रतिष्ठितसंस्थानमंडमध्ये
व्यूढं अंडं च प्रधानस्याणुरवयवो यथाकाशे खद्योत इति त
त्र पाताले जलधौ पर्वतेष्वेतेषु देवनिकाया असुरगंधर्वकिन्न
रकिंपुरुषयक्षराक्षसभूतप्रेतपिशाचापस्मारकाप्सरोब्रह्म
राक्षसकूष्मांडविनायकाः प्रतिवसंति सर्वेषु द्वीपेषु पुण्या
त्मानो देवमनुष्याः सुमेरुस्त्रिदशानामुद्यानभूमिः तत्र मि

भवनं नंदनं चैत्ररथं च मानसमित्युद्यानानि सुधर्मादेवसभा सुद
र्शनं पुरं वैजयंतः प्रासादः ग्रहनक्षत्रतारकास्तु चक्रवेगनिबद्धाः वायु
47 विक्षेपानियमेनोपलक्षितप्रचाराः सुमे -------- सन्निविष्टा
द्विविपरिवर्तंते भावनोनिवासिनः षड्देवनिकायाः त्रिदशास्त्र
ग्नि= यस्त्रायास्त्र नाथेनाः अपराजितामैतिवंशवर्त्तिवान्मा सद्य
नवशवर्त्तिनश्चेति सर्वेषां कल्पसिद्धाः अणिमाद्यैश्वर्योपपन्नाः
कल्पायुषो वृंदारकाः कामभोगिनः औपपादिकदेहाः ---
कुलाभिरक्षतोपि कृतपरिचाराः महति लोके प्राजापत्ये पंच
विधो देवनिकायः कुमुदा ----- नदनाभ्रजनाभाः प्राणि
नाभाः इत्येते महाभूतवाशीतोध्यानाहाराः कल्पसहस्त्रायुषः
६ प्रपश्य ---

वशीकृत्यसत्वपुरुषयोत्यन्ताप्रत्ययेनपरि——तस्माद्वासत्वा
त्परिणामित्वेत्यन्तविधर्मा शुद्धोन्यश्चितिमात्ररूपः पुरुषः।
तयोरत्यन्तासंकीर्णयो---त्ययाविशेषो भोगः पुरुषस्यद
र्शितविषयत्वात् स भोगप्रत्ययः सत्वस्य परार्थत्वाद्दृश्यः
यस्तु --माद्विपरीतश्चितिमात्ररूपोत्यः पौरुषेयप्रत्ययः त
त्र संयमात्पुरुषविषया प्रज्ञा जायते न च पुरुष---येन बुद्धि
सत्कामत्र -पुरुषो दृश्यते पुरुष एव तं प्रत्ययं स्वात्मालंबनं प
श्यति तथा ह्युक्तं वि---रमतिकेन विज------ति ३५
ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते प्रातिभा
त्स---व्यवहितविप्र---तीतानागतज्ञानं श्रावणाद्दि
१८ व्यशब्दश्रावणं वेदनाद्दिव्यस्पर्शाधिगमः आदर्शा---दूपा
अ॥ संवित् आस्वादाद्दिव्यरससंवित् वार्तातो दिव्यगन्धविज्ञा
प. प. नमित्येताः नित्यं जायन्ते ३६ ते स---उपसर्गा व्युत्थाने सि

प्र: ३

द्धयः ते प्रातिभादयः समाहितचित्तस्योत्पद्यमाना उपसर्गाः
तद्दर्शनप्रत -- कृत्वात्व्युत्थितचित्तस्योत्पद्यमानाः सिद्धयः
३७ बंधकारणशैथिल्यात्प्रचारसंवेदनाच्चचित्तस --
शरीरावेशः लोलीभूतस्यमनसोऽप्रतिष्ठस्यशरीरेकर्मा
शयवशाद्बंधः प्रतिष्ठेत्यर्थः तस्यकर्मणोबंधकारणस्य
शैथिल्यसमाधि — लाद्भवति प्रचारसंवेदनंचचित्तस्य
समाधिजमेवकर्मबंधक्षयात्स्वचित्तप्रचारसंवेदनाच्चयो
गी -- शरीरान्निःकृष्यशरीरांतरेषुनिःक्षिपतिनिक्षिप्तं
चित्तंचेंद्रियाण्यनुपतंतियथामधुकरराजानंमक्षिका
उत्पतंतमनूत्पतंतिनिविशमानमनुनिविशंतेतथेंद्रि
याणिपरशरीरावेशेचित्तमनुविधीयंतइति ३८ उदा
नजयाज्जलपंककंटकादिष्वसंगउत्क्रांतिश्च समस्तेंद्रि —
= — जीवा प्राणादिलक्षणजीवनतस्यक्रियापंचतयीप्राणो
नं

ऽस्वनासिकागतिर्हृदयवृत्तिः स ------ समानश्चा
नाभिवृत्तिः अपनयनादपानश्चापादतलंवृत्तिः उन्नयना
दुदानश्चाशिरो ------ पीव्यानइति एषांप्रधानंप्राणः
पंक:५४ उदानजयाज्जलकंटकादिष्वसंगःउत्क्रांतिश्चप्रयाणकाले
भवतितांवशित्वेनप्रतिपद्यते ३९ समानजयाज्ज्व-
लं जितसमानस्तेजसउपध्मानंकृत्वाज्वलयति ४० श्रो
त्राकाशयोःसंबंधसंयमाद्दिव्यंश्रोत्रं सर्वश्रोत्राणामा
काशंप्रतिष्ठाशब्दग्रहणंच यथोक्तं तुल्यदेशश्रवणानामेक-
श्रुतित्वंसर्वेषांभवतीतितच्चैतदाकाशस्यलिंगं ---
वरणंचोक्तं तथाऽमूर्त्तस्याप्यन्यत्रानावरणदर्शना
द्विभुत्वमपिप्रख्यातमाकाशस्यशब्दग्रह --- मित्तंश्रो
त्रं बधिराबधिरयोरेकःशब्दंगृह्णात्यपरःनगृह्णातीति
तस्माच्छ्रोत्रमेवशब्दविषयं --- काशयोःसंबंधेकृतसं

पा॰ यो॰ यमस्ययोगिनोदिव्यंश्रोत्रंप्रवर्त्तते ४१ कायाकाशयोःसंबंध
श्रा॰ संयम — — त्तूलसमापत्तेश्चाकाशगमनं यत्रकायस्तत्राकाशं
४९ तस्यावकाशदानात्कायस्यतेनसंबंध — — स्तस्मिं तत्रकृतसं त्रि:
५९ यम — — — — — — दिवंचल तुलादिष्वापरमाणुभ्यःसमा
पत्तिलब्धाजितसंबंध — — यःलघुत्वाज्जलेपादन्यासेन हरति
नाभि ४२ ततःस्तूर्णतन्तुमात्रेवेदनतपरश्मिभिश्चविहरति — — तोय
व्येष्वाकाशपतिरस्यभवतीति वहिरकल्पितावृत्तिर्महा
विदेहाततःप्रकाशावरणक्षय — — शरीराद्वहिर्मनसोवृत्तिलाभो
महाविदेहा नामधारणासायदिशरीरप्रतिष्ठ — स्यमनसोव
हि — — र्निमावेनाभवतिसाकल्पितेत्युच्यते य — शरीर
र — — वहिर्मूर्त्तिरयैवमनसोवृत्तिःस — — त्वकल्पिता तत्रक वहि
ल्पितयासाध्यंतेत्रकल्पितां — — — — — हामित्तियथा पर
शरीरावेशंतियोगिनः तेनाश्च धारणातःप्रकाशात्मनो

[illegible]
नन्ववतयोभवति ४१ [illegible]
[illegible]जय: [illegible] शङ्कादि [illegible]
धर्मि: [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] विश्रोहि [illegible] गत: सो
[illegible] सूर्य [illegible] गत: स्य
४० ह: उभये देवमनुष्या: [illegible] एको भाग: [illegible]
४४. द्वितीयो भाग: [illegible] मच भेदाभेद वि
४५.४६. वक्षितः [illegible]

पा॰ यो॰ घटत्विसपुनर्द्विविधोयुतसिद्धाःवयवोऽयुतसिद्धावयवश्च
शा॰ युतसिद्धावयवात्तत्रोवनंसंघइति अयुतसिद्धावयवा
५० वःसंघातः शरीरंवृक्षःपरमाणुरिति अयुतसिद्धावयवभेदा
50 नुगतःसमूहोद्रव्यमितिपतंजलिः एतत्स्वरूपमित्युक्तं अथ
किमेषांसूक्ष्मरूपं तन ------ णांतस्यैकोवयवःपरमा
णुःसामान्यविशेषात्माऽयुतसिद्धावयवभेदानुगतःस
मुदाय ------ वंतन्मात्राणिएतत्तृतीयं अथभूतानांचतु
र्थरूपंख्यातिक्रियास्थितिशीलागुणाःकार्य ----- नुपा
तिनोन्वयशब्देनो ----- षांपंचमंरूपंअर्थवत्वंभोगापव
र्गार्थतागुणेष्व --- नी गुणास्तन्मात्रभूतभौतिके --
---र्थवत् तेष्विदानींभूतेषुपंचसुपंचस्वरूपेषुसंयम -
----पस्वरूपदर्शनंजयश्चप्रादुर्भवतितत्रपंचभूतस्वरूपा
णिजित्वाभूतजयीभवति तज्जयाद्वत्सानुसारिण्यइवगावो

स्यसंकल्पानुविधायिन्यो भूतप्रकृतयो भवंति ४४ ततो ऽणि
मादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च तत्राणिमाम
राउः वत्यन्तलाघिमा लघु भवति महिमा महान्भवति गरिमा गु
रु प्राप्तिरंगुल्यग्रेणापि स्पृशति चंद्रमसं प्राकाम्यमिच्छानभिघातः भू
मावुन्मज्जति निमज्जति च यथोदके वशित्वं भूतभौतिकेषु वशी
भवत्यवश्यश्चान्येषां ईशित्वं तेषां प्रभवाप्ययव्यूहाना
मीष्टे यत्रकामावसायित्वं सत्यसंकल्पता यथा संकल्पस्तथा रा=
भूतप्रकृतीनामवस्थानं न च शक्तोऽपि पदार्थविपर्यासं क
रोति कस्मादन्यस्य यत्रकामाव - - - नः पूर्वसिद्धस्य तथा
भूतेषु संकल्पादिति एतान्यष्टावैश्वर्याणि कायसंपद्वक्ष्य
४५ माणा तद्धर्म - - - घातश्च पृथ्वी मूर्त्या न निरुणद्धि योगि
नः शरीरादिक्रियां शिलामप्यनुविशतीति नापः स्निग्धाः
ঌ.ঌ. - - - - - ति नाग्निरुष्णो दहति न वायुः प्रणामी वहति श्र

पा॰ यो॰
शा॰
५२

नावरणात्मकेप्याकाशेभवत्यदृश्यः कायः सिद्धानामप्य
दृश्यो भवति ४५ रूपलावण्यबलवज्रसंहननत्वानि कायसं
पत् दर्शनीयः कान्तिमानत्वाद्यतिशयबलः द संहननश्चे
ति ४६ ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादि
न्द्रियजयः सामान्यविशेष — — — — दर्ग्राह्यः तेष्विन्द्रियाणां
वृत्तिर्ग्रहणं न च तत्सामान्यमात्रेण — — — — सविक — ना
लोचितः स विषयविशेष इन्द्रियेण मनसानुव्यवसीयेतेति
स्वरूपं पुनः प्रकाशात्म — — — — सत्त्वस्य सामान्यविशे
षयोरयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिन्द्रियं
तेषां तृतीयं रूपं — अस्मितालक्षणोऽहंकारः तस्य सामान्य
स्येन्द्रियाणि विशेषाः चतुर्थं रूपं व्यवसायात्मकाः प्र
— — क्रियास्थितिशीला गुणाः एषां इन्द्रियाणि साहंका
राणि परिणामः पंचमं रूपं गुणेषु यदनुगतं — पार्थ

51

त्त्वमिति पंचस्वेतेषु इंद्रियरूपेषु यथाक्रमं संयमः तत्र तत्र जयं
कृत्वा पंचरूपजयादि — यजयः प्रादुर्भवति योगिनः ४७
ततो मनोजवित्वं विकरणभावः प्रधानजयश्च कायस्यानुत्तमो
— — लाभो मनोजवित्वं विदेहानामिंद्रियाणामभिमतकाल
तदपरित्यागी देशविषयापेक्षो वृत्तिलाभो विकर — भावः सर्वप्रकृतिविकार
वा — — — — — — अयश्च यित्नास्तिस्रः सिद्धयो मधुप्रतीका उच्यंते
एतास्वकरणपंचकस्वरूपजयादधिगम्यते ४८ सत्वपुरु
षान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं — ज्ञातृत्वं
च निर्धूतरजस्तमोमलस्य बुद्धिसत्वस्य वैशारद्ये परस्यां वशी
कारसंज्ञायां वर्तमानस्य — त्वपुरुषान्यताख्यातिमात्ररू
पप्रतिष्ठस्य सर्वभावाधिष्ठातृत्वं सर्वात्मानो व्यवसा — गुणानां च
— कारः स्वामिवदाक्रमंते शेषदृश्यात्मत्वेनोपस्थितानि
त्यर्थः सर्वज्ञातृत्वं सर्वात्मनां गुणानां — तोदितान्यपदेश्य

पा. यो. भा. ५३

83

धर्मित्वेनव्यपस्थितानामक्रमोपारूढंविवेकजंज्ञानमित्यर्थः
इत्येषाविशोकानामसिद्धिःयांप्राप्ययोगीसर्वज्ञःक्षीणक्ले
शबंधनोवशीविहरति ४९ तद्वैराग्यादपिदोषबीजक्षयेकै उभय ११
वल्यं यदास्यैवंभवतिक्लेशकर्मक्षयेसत्वस्यायंविवेकप्र
त्ययःसत्वंचहेयपक्षेन्यस्तंपुरुषश्चापरिणामीशुद्धोन्यःस
त्वादित्येवमस्यततोविरज्यमानस्ययानिक्लेशबीजानिदग्ध
शालिबीजकल्पान्यप्रसवसमर्थानितानिसहमनसाप्र
त्यस्तंगच्छंति तेषुप्रलीनेषुपुरुषःपुनरिदंतापत्रयंनभुंक्ते
तदेतेषांगुणानांमनसिकर्मक्लेशविपाकस्वरूपेणाभि
व्यक्तानांचरितार्थानांप्रतिप्रसवेपुरुषस्यात्यंतिकोगुण
वियोगःकैवल्यं तदास्वरूपप्रतिष्ठाचितिशक्तिरेवपुरुष
इति ५० स्थान्युपनिमं——————करणेपुनरनिष्ट
प्रसंगात् चत्वारःखल्वमीयोगिनः प्रथमकल्पिकोम

धुभूमिकः प्रज्ञाज्योतिरतिक्रांतभावनीयश्चेति तत्राभ्या
सीप्रवृत्तमात्रज्योतिः प्रथमः ऋतंभरप्रज्ञोद्वितीयः भूते
न्द्रियजयीतृतीयः सर्वेषुभावितेषुभावनीयेषुकृतर
क्षाबंधः कर्तव्यसाधनादिमांश्चतुर्थः यस्त्वतिक्रांतभा
वनीयःतस्यचित्तप्रतिसर्गएकोर्थः सप्तविधास्यप्रांतभू
मिप्रज्ञा तत्रमधुमतींभूमिंसाक्षात्कुर्वतोब्राह्मणस्यस्था
निनोदेवाःसत्वशुद्धिमनुप —— स्थानैरुपनिमंत्रयं
ते भोइहास्यतां इहरम्यतांकमनीयोयंभोगःकमनीयेयं
कन्यारसायनं —— जरामृत्युंबाधतेवैहायसमिदंयानं
अमीकल्पद्रुमाःपुण्यामंदाकिनीसिद्धामहर्षयःउत्तमा
९४ नुकू — अप्सरसः दिव्येश्रोत्रचक्षुषीवज्रोपमःकायःस्व
गुणैःसर्वमिदमुपार्जितमायुष्मताप्रतिपद्य —— इदम
पा. सू. क्षयमजरममर — स्थानंदेवानांप्रियमित्येवमभिधीयमा

नः संगदोषान्भाव — — घोरेसंसा — — गारेपच्यमानेनम
याजननमरणांधकारेविपरिवर्त्तमानेनकथंचिदासादि
तःक्लेशतिमिरवि — — नाशीयोगप्रदीपःतस्यचैतेतृष्णायोनयः
योविषयवायवःप्रतिपक्षाःसखल्वहंलब्धालोकःकथमन
— विषयमृगतृष्णयावंचितस्तस्यैवपुनःप्रदीप्तस्यसंसा
राग्नेरात्मानमिंधनीकुर्यामितिस्वस्तिवःस्वप्नोपमेभ्यः
कृपणजनप्रार्थनीयेभ्योविषयेभ्यइत्येवंनिश्चित
मतिःसमाधिंभावयेत् संगमकृत्वास्मयमपिनकु
र्यात् एवमहंदेवानामपिप्रार्थनीयइति स्मयादयंसु
स्थितंमन्यतयामृत्युनाकेशेषुगृहीतमिवात्मानंनभावयिष्यति त
थाचास्यच्छिद्रांतरप्रेक्षीनित्यंयत्नोपचर्यःप्रमादोलब्धविवरःक्ले
शानुत्तंभयिष्यतिततःपुनरनिष्टप्रसंगः एवमस्यसंगस्मयौ
अकुर्वतोभावितोर्थोदृढीभविष्यतिभावनीयश्चार्थोभिमुखी

रवीभविष्यतीति ५२ क्षणतत्क्रमयोः संबंधसंयमा
द्विवेकजंज्ञानं यथापकर्षपर्यंतंद्रव्यंपरमाणुरेवंप
रमापकर्षपर्यंतः कालः क्षणः यावतावासमयेनच
लितः परमाणुः पूर्वदेशंजह्यादुत्तरदेशमुपसंपद्येत
सवा इतिहि ५ सकालः क्षणः तत्प्रवाहाविच्छेदस्तुक्रमः क्षणतत्
क्रमयोर्नास्तिवस्तुसमाहारः बुद्धिसमाहारोमुहूर्ताहो
रात्रादयः सखल्वयंकालोवस्तुशून्योपिबुद्धिनिर्माणः
शब्दज्ञानानुपातीलौकिकानांव्युत्थितदर्शनानांवस्तु
स्वरूपइवावभासते क्षणस्तुवस्तुपतितः क्रमावलं
बी क्रमश्चक्षणानंतर्यात्मातंकालविदः कालइत्या
चक्षतेयोगिनः नचद्वौक्षणौसहभवतः क्रमश्चन
द्वयोः सहभुवोरसंभवात्पूर्वस्मादुत्तरस्यभाविनो
यदानंतर्यंक्षणस्यसक्रमः तस्माद्वर्तमानएवैक[illegible]णः

पा॰यो॰ नसर्वैस्तैःक्षणाःसंतीति तस्मान्नास्तितत्समाहारः

शा॰ येतुभूतभाविनःक्षणास्तेपरि ----------------

५५ ---------- क्षणेनकृत्स्नोलोकःपरिणाममनुभव

ति तत्क्षणोपारूढाः खल्व ---------- याःक्षणत

त्क्रमयोःसंयमात्तयोःसाक्षात्करणंततश्चविवेकजं

ज्ञानंप्रादुर्भवति तस्यविषयविशेषउपक्षिप्यते

जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोःततःप्रतिप

त्तिः तुल्ययोर्देशलक्षणसारूप्येजातिभेदोऽन्यताया

हेतुःगौरियंवडवेयमितितुल्यदेशजातीयत्वेलक्षण

मन्यत्वकरं कालाक्षी —— स्वस्तिमतीगौरितिद्वयो

रामलकयोर्जातिलक्षणसारूप्याद्देशभेदोऽन्यत्वकरइदं

पूर्वमिदमुत्तरमिति यदातुपूर्वमामलकमन्यव्यग्रस्यज्ञातु

उत्तरदेशउपावर्त्यतेतदातुल्यदेशत्वेपूर्वमेतदुत्तरमेतदिति

विभागाद्युपपत्तिः असंदिग्धेन च तत्तत्त्वेन भवितव्यं
इत्यत आह एकत्वेन तेन तः प्रतिपत्तिर्विवेकजाज्ज्ञानादिति कथं
उत्तरं पूर्वामलकसहक्षणदेशादुत्तरामलकसहक्षणतायाः
दृष्टान्तभिन्नः नैवामलके स्वदेशक्षणानुभवभिन्ने अ
न्यदेशक्षणानुभवस्तन्नयोरन्यत्वे हेतुरिति एतेन द
ष्टान्तेन परमाणोरपि सजातीयजातिलक्षणदेशस्य पूर्वपरमाणु
देशसह — — क्षणात्क्षणादुत्तरस्य परमाणोस्तद्देशा
द्युत्पत्तावुत्तरस्य तद्देशानुभवो भिन्नः — — — क्षणःद्विः
सहक्षणा — दनुयोगीश्वरस्यान्यत्वप्रत्ययो भवतीति
अपरे तु वर्णयन्ति येऽन्त्या विशेषवन्तस्ते इत्यतः प्रत्ययं कु
न्मतेपि= र्वन्तीति नैवापि देशलक्षणभेदो मूर्त्तिव्यवधिजातिभेद
श्चान्यत्वे हेतुः दृशाभेदस्त्वनुयोगिबुद्धिगम्य — — ति क्षा
णूनां मूर्त्तिव्यवधिजातिभेदावत्तारास्ति मूलकारणत्वमिति

भा

ग

पा.यो. सर्वगमयः तारक ------ सर्वथाविषयमक्रमंचे
शा. तिविवेकजज्ञानं तारकमितिस्वप्रतिभोत्थमनौपदेशि
५६ कमित्यर्थः स -- र्वथात्वात्नास्य किंचिद विषयीभू
तमित्यर्थः सर्वथाविषयं सर्वमतीतानागतप्रत्युत्प
न्नं सर्वपर्या -- सर्वथा जानातीत्यर्थः अक्रममित्येक
क्षणोपारूढं सर्वं सर्वथा गृह्णातीत्यर्थः एतस्य विवेक
जज्ञानस्य परि -- मस्यैवांशो योगप्रदीपो मधुमतीं भूमिमुपादा म
य यावदस्य परिसमाप्तिरिति प्राप्तविवेकज -- ज्ञा -- स्याप्राप्त व
----- तस्य वा सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति
यदा निर्धूतरजस्तमोमलं बु ---------------
------ धिकारं दग्धक्लेशबीजं भवति तदा पुरुषस्य शु
द्धिसारूप्यमिवाप -- भ -- मादापुरुषस्योपचरितभोगा
भावः शुद्धिः एतस्यामवस्थायां कैवल्यं भवति ईश्वरस्या

भिन्नेश्वरमेवनक्कर्तयः स्वाभाविकारम्भप्रज्ञापयति॥ या
थावात्स्वरूपात्रिकः तास्मिन्विवक्तारेतन्मनवाति ऽद
कानुभौमान्वारमाम्बोयान्यदूलान्यऽग्रवद्भावि ऽकि
मोहिंत्तद्भगविद्धकश्चामाकाद्दिष्यनिनोपकश्चाद्विवाप
हेश्रुतेवात्त्वयमेवरसा याम्ब्ये दूलान्यवश्राविशति
न चाधेमोक्षनिवृत्तिमाचेकारसोऽत्र धर्मस्य शुध्यम्भुष्यो
रत्यंतविरोधात्तनतत्प्रकृतिप्रवृत्तौ धर्मो हि केऽभवतीति
भूतंदीश्वरादयउदाहार्याः विपर्यये राज्य धर्मो
धर्मवाधते तत्र आशुद्विपरिराग महति नच — — ऽवा
जगरादयउदाहार्याः — — नयोगीवहूनकायो ... निमी
९८ तेनदाकिमेक मनस्कास्ते भवंति अथानेक मनस्का
इति निर्माणाचि .. स्मिताभावात् .. अस्मितामात्र
चित्तकारणानुपन निर्माणचित्तानिकरोति ततः सां
दा

पा॰यो॰ तानि भवन्तीति प्रवृत्तिभेदे प्रयोजकं चित्तमेकम
शा॰ नेकेषां ५ बहूनां चित्तानां — केष्यमेकं चित्तमभि
५८ प्रायपूर्वकं प्रवृत्तिरिति सर्वचित्तानां प्रयोजकं चि
त्तमेकं निर्मिमीते तेन न प्रवृत्तिभेदः तत्र ध्यानजम
58 नाशयं — पंचविधं निर्माणचित्तं जन्मौषधिमं
त्रतपःसमाधिजाः सिद्धय इति तत्र यद्ध्यानजं
चित्तं — नाशयं तस्यैव नास्ति आशयो रागादि
प्रवृत्तिः नातः पुण्यपापाभिसंबंधः क्षीणक्लेशत्वाद्योगिन
इ — इतरेषां तु विद्यते कर्माशयः यतः कर्माशुक्लाकृष्णं
योगिनः त्रिविधमितरेषां ७ चतुष्पात्खल्वियं — जा
तिः कृष्णा शुक्लकृष्णा शुक्ला अशुक्लाकृष्णा चेति त
त्र कृष्णा दुरात्मनां शुक्लकृष्णा बहिःसाधन — त
त्र परपीडानुग्रहद्वारेण कर्माशयप्रचयः शुक्ला तपःस्वा

नी — रस्यवाविवेकजज्ञानभागिनः रजस्तमसवा नाहिद
ग्धक्लेशबीजस्यज्ञानेपुनरपेक्षाकाचिदस्ति — तस्माद्वि
वैराग्यतत्समाधिजमैश्वर्यंज्ञानंचोपक्रान्तं परमार्थत
स्तुज्ञानाददर्शनंनिवर्तते न — तस्मिन्सत्युत्तरेक्लेशाः
क्लेशाभावात्कर्मविपाकाभावः चरिताधिकाराश्चैत
स्यामवस्थायांगुणा — पुरुषस्यपुनर्दृश्यत्वेनोपति
ष्ठन्तेतत्पुरुषस्यकैवल्यं तदापुरुषः स्वरूपमात्रज्यो
तिरमलः केवल — भवति इतिपातञ्जलसांख्यप्रवचने
विभूतिपादस्तृतीयः जन्मौषधिमन्त्रतपःसमाधि — ः
९८ सिद्धयः १ देहान्तरिताजन्मासिद्धिः औषधीभिरसुरभ
सा. वनेषुरसायनेनेत्येवमादिः मन्त्रैराकाश — तपसा
वि. ३॥. मणिसिद्धिः तपसासंकल्पासिद्धिः कामरूपीयत्रतत्र
वकामयतइत्येवमादिसमाधिजाः — योव्याख्याताः

तत्रकायेंद्रियाणामन्यजातिपरिणतानां जात्यं
तरपरिणामः प्रकृत्यापूरात् २ पूर्वपरिणामापायः
उत्तरपरिणामोपजनः तेषामपूर्वावयवानु
प्रवेशाद्भवति कायेंद्रियप्रकृतयश्च स्वं स्वं विकारम
नुगृह्णंति आपूरेणधर्मादिनिमित्तमपेक्षमाणा इ
ति निमित्तमप्रयोजकंप्रकृतीनांवरणभेदस्तुततः क्षे
त्रिकवत् ३ नहिधर्मादिनिमित्तंप्रयोजकंप्रकृती
नांभवति नकार्येणकारणंप्रवर्त्यत इति कुतस्त
र्हिवरणभेदस्तुततः क्षेत्रिकवत् यथा क्षेत्रिकः के
दारात्पापूर्णात्केदारांतरंपिप्लावयिषुः समंनिम्नं नि
म्नतरंवानापः पाणिनापकर्षति किं त्वावरणं त्वासांभि
नत्ति तस्मिन्भिन्ने स्वयमेवापः केदारांतरमाप्लावयंति
तथा धर्मः प्रकृतीनामावरणमधर्मं भिनत्ति तस्मिन्

ध्यायध्यातवतां सा हि केवले मनसि ——— यत्त्वादबहिः
साधनाधीनानपरान्पीडयित्वा भवति अशुक्लाकृ
ष्णा संन्यासीनां क्षीणक्लेशानां चरमदेहानामिति
तत्राशुक्लं योगिन एव संन्यासादकृष्णं चानुपादानात्
इतरेषां तु भूतानां पूर्वमेव त्रिविधमिति ८ ततस्तद्वि
पाकानुगुणानामेवाभिव्यक्तिर्वासनानां ततइति
त्रिविधात्कर्मणात्तद्विपाकानुगुणानामेवेति यज्जाति
यस्य कर्मणो यो विपाकः तस्यानुगुणा याः वासनाः
कर्मविपाकमनुशेरते तासामेवाभिव्यक्तिः न हि दैवं
कर्मविपच्यमानं नारकतिर्यङ्मनुष्यवासनाभिव्य
ग६ क्तिनिमित्तं भवति किंतु दैवानुगुणा एवास्य वासना
या. व्यज्यन्ते नारकतिर्यङ्मनुष्येषु चैवं समानश्चर्चः ९
या.सू. जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कार

पा·यो· रयोरेकरूपत्वात् वृषदंशविपाकोदयः स्वव्यंज
भा· कांजनाभिव्यक्तः स यदि जातिशतेन वा दूरदेशत
५९ या वा कल्पशतेन वा व्यवहितः पुनश्च स्वव्यंजकांज
न एवोदियात् द्रागित्येवं पूर्वानुभूतवृषदंशविपाकाभि
58 संस्कृता वासना उपादाय व्यज्येत कस्मात् यतो व्यवहिता
नामप्यासां सदृशं कर्माभिव्यंजकं नि
मित्तीभूतमित्यानंतर्यमेव कुतश्च स्मृतिसंस्कारयोरे
करूपत्वात् यथानुभवास्तथा संस्कारास्ते च क
र्मवासनानुरूपाः यथा च वासनास्तथा स्मृतिरिति जाति
देशकालव्यवहितेभ्यः संस्कारेभ्यः स्मृतिः स्मृतेश्च पु
नः संस्कारा इत्येवमेते स्मृतिसंस्काराः कर्माशयवृत्ति
लाभवशाद्व्यज्यंते अतश्च व्यवहितानामपि निमित्त
नैमित्तिकभावानुच्छेदादानंतर्यमेव सिद्धमिति ९

तासामनादित्वंचाशिषोनित्यत्वात् ११ तासांवा
सनानामाशिषोनित्यत्वादन —— येयमात्माशी
र्मानभूवंभूयासमितिसर्वस्यदृश्यतेसानस्वाभावि
की कस्मात् जातमात्रस्यानन —— मरणधर्मकस्य
द्वेष ——— स्मृतिनिमित्तोमरणत्रासःकथंभवेत्
नचस्वाभाविकंवस्तुनिमित्त —— दत्ते तस्मादनादि
वासना — विद्धमिदंचित्तंनिमित्तवशात्काश्चिदेववा
सनाःप्रतिलभ्यपुरुषस्य ——— योपावर्त्तत इति घट
प्रासादप्रदीपकल्पंसंकोचविकाशिचित्तंशरीरप
रिमाणाकारमात्रमिति — परेप्रतिपन्नाः तथाचान्त
राभावःसंसारश्चयुक्त इति वृत्तिरेवास्यविभुनः
संकोचविकाशिनी ——— र्यः तच्चधर्मादिनिमित्ता
पेक्षं निमित्तंचद्विविधंबाह्यमाध्यात्मिकंचशरीरादि

पा॰ यो॰ साधनपादेवाह ---- दीनामभिवादनादीनि चित्तप्र
शा॰ ञ्राधीलं श्रद्धायाध्यात्मिकं तथ्याश्चोत्तं पैवैमैत्र्या
६॰ दयो ध्यांपितां विहाराः ते वाह्यसाधनतिरन्तरंग्रहात्मा
नः प्रकृष्टं धर्ममभिनिर्वर्त्तयन्ति तयोर्मनिसंवलीः
60 यः कथं ज्ञानवैराग्ये केनातिशय्येते दंडकारांध
चिन्नवलव्यतिरेकेणकः शरीरेसाकर्माणामृन्त्यंक
र्ण रसैहिः समुद्रमगस्त्यवद्यापिवेत् ११ कैकफला
श्रयालंवेदैः संगृहीतिरवादौ वाममभावित दभावः हे॥
धर्मात्सुखं अधर्माद्दुःखं तस्माद्रागो दुःखाद्द्वेषः तत्राश्र
श्रयतै ततेन मनसा वाचा कायेन वा परिस्पंदमानः पर
मनुग्रह्णाति करहति वा ततः पुनर्धर्माधर्मौ सुखदुः
खे रागद्वेषाविति प्रवृत्तमिदं षडरसंसारचक्रम्
--- समावर्त्तमानस्याविद्यानेत्री मूलं सर्वक्लेशानामि

भित्येषहेतुः फलंतुयमाश्रित्ययस्यप्रत्युत्पन्नताधर्मादेः
नह्यपूर्वोपजनः मनस्तुसाधिकारमाश्रयोवासनानांन
ह्यवसिताधिकारेमनसिनिराश्रयावासनाःस्थातुम
त्सहंते यदाभिमुखीभूतंवस्तुयांवासनांव्यन -- क्ति
तस्यास्तदालंबनं एवंहेतुफलाश्रयालंबनैरेतैःसंग
हीताःसर्वावासनाएषामभावेतत्संश्रयाणामपिवा
सनानामभावः नास्त्यसतःसंभवोनचास्तिसतोवि
नाशइति द्रव्य -- संभवंत्यःकथंनिवर्तिष्यंतेवास
नाइति अतीतानाग -- रूपतोस्त्यध्वभेदाद्धर्माणां
भविष्य -- कामनागतं अनुभूतव्यक्तिकमतीतंस्व
व्यापारोपारूढंवर्तमानं त्रयंचैतद्वस्तुज्ञानस्यज्ञेयं -
-यदिचैतत्स्वरूपतोनाभविष्यन्नेदंनिर्विषयंज्ञानमुद
पत्स्यततस्मादतीतानागतंस्वरूपतोस्तीति -- चभोग

नि=

पा·यो भोगीयस्यवाकर्मणा:फलमुत्पित्स्यदितिवक्तुपारख्यामि

श्रा· त्तिनिरुद्ध —— तेनानिमित्तेनकु ——————— युज्येत सत्त

६१ प्रफलस्यनिमित्तंवर्तमानीकरणोसमर्थनाप्तु —— नो

नि= ननैतत्सिद्धंसाधिततेनेमी —— स्यविशेषवान्प्रहणांकरुते

61 नापूर्वमुत्पादयतीति धर्मस्यानेक —— भावःतस्य

वाधर्मेदेवधर्मा:प्रत्यवास्थित्ताः नचयथावर्तमानंक

५ त्तिविशेषवापन्नवानोस्ति ए —— नैमनागतंचकथं

नहिस्वेनैवन्धर्मेणस्वरूपेणानागतमासितिचेनवातुम

नव्यक्तिकेनस्वरूपे —— नमितिवर्तमानस्यैवाधुना:

स्वरूपस्यास्तितीतिनसाभवतिप्रतीतानागतयोरधु

नैरूपकस्यवाधुनः समयेन्नावधुनौ धर्मिसमन्वागतो धा

भगवद्ध्वानि नापुरुत्वाभावत्वप्राणामध्वनामीति

नैव्वमतोतत्तदमार्गणमात्मानः ए३ नैरवल्वमोत्प्रधां

नोधर्मवर्त्तमानाव्यक्तात्मानोऽतीतानागताः
सूक्ष्मात्मानः षडविशेषरूपाः सर्वमिदं गुणानां स
न्निवेशविशेषमात्रमितिपरमार्थतोगुणात्मा
नः तथाचशास्त्रानुशासनं गुणानांपरमंरूपं
नदृष्टिपथमृच्छति॥ यत्तुदृष्टिपथंप्राप्तंतन्मायेव
सुतुच्छकमिति यदातुसर्वेगुणाः कथमेकः श
ब्दएकमिंद्रियमिति परिणामैकत्वाद्वस्तुतत्वं
१४ प्रख्याक्रियास्थितिशीलानांगुणानांग्रह
णात्मकानां — — णभावेनैकः परिणामःश्रोत्र
मिंद्रियं ग्राह्यात्मकानांशब्दभावेनैकःपरिणा
मःशब्दोविषय — — — दीनांमूर्त्तिसमानजा
तीयानामेकःपरिणामःपृथिवीपरमाणुःतन्मा
त्रावयवःतेषांचैकःपरिणामःपृथिवीगौर्वृक्षः

पा॰ यो॰ पर्वनिवृत्ती एवमादिभ्रन्तांतरेष्वापित्वेहैस्यात्र
शा॰ शागमित्त्वाविकारादानान्युपादायसामान्यमेक
६२ विकारारंभः समाधेयः नास्त्यर्थोविज्ञानविसह
चरोस्तिज्ञमर्थ्यविसहचरंतत्प्रादोकाल्पिनमित्य
62 नयादिशायैवस्वस्वरूपंमपहृवनेहीनाथारि
कोल्पितनामात्रवस्तुस्वमसेविषयेयोपमंतपरमार्थ
तोत्पीतितियघ्नाहुः तेज्यथेतिमप्युपास्ति —

यथेतरासंनिद्रिवर्णाशङ्खादयश्चक्षुरादृश्यन्ते नात्रस्वाभासानि
नथ्यामतोपिप्रत्येतस्व न चाग्निरत्रदृष्टांतः नह्यग्नि
रात्मरूपमप्रकाशंप्रकाशयति प्रकाशस्याथप्रका
श्यप्रकाशमयोगेदृष्टः नचस्वरूपमात्रोस्तिसंयोगः
किंचस्वाभासंचित्तमित्यग्राह्यमेवकस्यचिदितिशब्दा
र्थः नथ्यथात्मप्रतिष्ठमाकाशंमित्यथातिष्ठमेवा
त्यर्थः स्वबुद्धिप्रचारप्रतिसंवेदनात्सत्वानांप्रवृत्ति
र्दृश्यते क्रुद्धोहंभीतोहममुत्ररागोममुत्रमेक्रोध
इत्येतत्स्वबुद्धेरग्रहणेनयुक्तमिति एकसमये---
---चाधारणं नचकस्मिन्क्षणेस्वपररूपावधारणं
युक्तंक्षणिकवादिनोयद्भवनंसैवक्रियाकारकं ----र
कमित्यभ्युपगमः स्यान्मतिः स्वरसनिरुद्धंचित्तंचि
त्तांतरेणसमनंतरेणगृह्यतइति चित्तांतरदृश्ये

पा॰ यो॰ द्विबुद्धेरति प्रसंगः स्मृति संकरश्च २१ अथ चित्तं चेचि
शा॰ त्तांतरेण गृह्येत बुद्धि — — बुद्धिः केन गृह्यते स — पि
६४ न्ययासाप्यन्ययेत्यतिप्रसंगः स्मृतिसंकरश्च
65 यावंतो बुद्धिबुद्धीनामनुभवास्तावत्यः स्मृतयः प्र
नः प्राप्नुवंति तत्संकरा चैकस्मृत्यनवधारणं स्या
दित्येव बुद्धिसंवेदिनं पुरुषमपलपद्भिर्वैनाशिकैः
सर्वमेवाकुलीकृतं तेन भोक्तृस्वरूपं यत्र क्वचन क
ल्पयंतो नन्यायेन संगच्छते केचित्सत्वमात्रमपि प
रिकल्प — स्तिस सत्वो य एतांश्च स्कंधान्निः क्षिप्या
न्यांश्च प्रतिसंदधातीत्युक्त्वा तत एव पुनस्त्रस्यंति।
तथा स्कं — — नां महन्निर्वेदाय विरागायानुत्पादाय
प्रशांतये गुरोरंतिके ब्रह्मचर्यं चरिष्यामीत्युक्त्वा।
सत्वस्य पुनः सत्वमेवापह्नुवते सांख्ययोगाद

स्वभवादाः स्वशब्देन प्रकृत्यमेवस्वामिनंचित्तस्य
भोक्तारमुपनयतीति कथं चित्तेरप्रतिसंक्रमायाः
स्व तदाकारापत्तौ बुद्धिसं — दनं २१ अपरिणामिनी
हि भोक्तृशक्तिरप्रतिसंक्रमाचंपरिणामित्यर्थे
प्रतिसंक्रांतेवतद्वृत्ति — — नाति नस्याश्चप्राप्तचैत
न्यो — पलब्धरूपायाबुद्धिवृत्तेरनुकारमात्रतयाबुद्धि
रप्यविशिष्टादे — — नवृत्तिराख्यायते न — — — —
न पातालंनाविवरंगिरीणांनैवांधकारंकुक्षयोनो
दधीनांगुहा — स्यांनिहितंब्रह्मशाश्वद — — — —
त्तिमविशिष्टांकवयोवेदयंत इति अतश्चैतदप्युप
गम्यते द्रष्टृदृ — परक्तंचित्तंसर्वार्थं र मनोहि
मंतव्येनार्थेनोपरक्तंतत्स्वयंचाविषयत्वात्विष
यिणापुरुषेणात्मीयया वृत्त्याभिसंबद्धंता
प्रकृ

या॰ वो॰ ------ दृश्योपरक्तं विषयविषयिनिर्भासं चे॰

शा॰ --- चितनस्वरूपापन्नाविषयात्म --- विषयात्म

६५ ------ देतनामिवस्फटिकमणिकल्पं सर्वार्थमि

त्युच्यते --- नेनाचित्तसारूप्येण --- केचिद्द

65 वकेतना --- ः अपरेदि

नीयमेतत् कथमस्तिप्रश्न ए——— यः सर्वोजातो
मरिष्यतिमृत्वाजनिष्यते ओंभोइति अथसर्वोजातो
मरिष्यतिमृत्वाजनिष्यतइति ——— वचनीयमेतत्
प्रत्युदितख्यातिःक्षीणतृष्णकुशलोनजनिष्यत
इतरस्तुजनिष्यते तथामनुष्यजातिः श्रेयसीनवा
श्रेयसीति एवंपरिपृष्टेविभज्यवचनीयःप्रश्नःपशू
नुद्दिश्यश्रेयसीदेवानृषीनधिकृत्यनेति अयंत्वव
चनीयःप्रश्नःसंसारोयमंतवानथानंतइति कुश
ल—— स्तिसंसारक्रमपरिसमाप्तिःनेतरस्येतिअन्य
तरावधारणेदोषः तस्माद्व्याकरणीयएवायंप्रश्न
इति —— गुणाधिकारक्रमपरिसमाप्तौकैवल्यमुक्तंतत्स्व
रूपमवधार्यते पुरुषार्थशून्यानांगुणानांप्रतिप्रसवः
—वल्यंस्वरूपप्रतिष्ठावाचितिशक्तिरिति ३४ ॥

पा॰ यो॰ भोगापवर्गार्थतां पुरुषस्यार्थशून्यानां यः प्रतिप्र
शा॰ सवः कार्यकारणात्मनां गुणानां तत्कैवल्यं स्वरू
६८ पप्रतिष्ठा पुनर्बुद्धिसत्त्वानभिसंबंधात्पुरुषस्य चि
68 तिशक्तिरेव केवला संगः सदा तथैवावस्थानं कै
वल्यमिति ॥ ॥ इति श्रीपातंजले योगशास्त्रे सांख्य
प्रवचने वेदव्यासभाष्ये कैवल्यपादश्चतुर्थः संपूर्णः
॥ ॥छ॥ ॥ षडंगरसभूसंख्ये विक्रमाद्गतसंत
पते वत्सरे पंचम्यां च श्रीगुरोर्हितसाधुरामशर्म्मणः
सत्र ८३ पौषशु॰ ५॰ संसरानि शुभं भूयात् शुभं
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया यदिशु
द्धमशुद्धं वा मम दोषो न दीयते ॥

नं. ९६

इति पातंजल सांख्य प्रवचन भाष्य ॥

४३७५